Vedas. Yajurveda. Vājasaneyi-
samhitā. Selections
, Vājasaneyi Mādhyandina
Śukla Yajurveda saṃhitāyāh
sarvānukramasūtram

PK
3302
S82


Vedas. Yajurveda. Vajasaneyisamhita. Selections



वाजसनेयि- माध्यन्दिन-शुक्ल

यजुर्वेद संहितायाः सर्वानुक्रमसूत्रम्

Vajasaneyi Mādhyandina Śukla Yajurveda samhitāyāḥ sarvānukrama-sūtram



स्वाध्याय-मंडल, किल्ला-पारडी (जि. सूरत)

n.d.

मूल्य १॥) रु.



PK
3302
S82



922959



अथ वाजसनेयि--माध्यन्दिन--शुक्ल--
यजुर्वेद संहितायाः

सर्वानुक्रमसूत्रम् ।

ॐ मण्डलं दक्षिणमक्षि हृदयं चाधिष्ठितं येन, शुक्लानि यजूंषि भगवान् याज्ञवल्क्यो यतः प्राप, तं विवस्वन्तं त्रयीमयमर्चिष्मन्तमभिध्याय, माध्यन्दिनीये वाजसनेयके यजुर्वेदाम्नाये स-र्चे स-खिले स-शुक्रिय ऋषि-दैवत-छन्दांस्यनुक्रमिष्यामो, यजुषामनियताक्षरत्वादेकेषां छन्दो न विद्यते, द्रष्टार ऋषयः, स्रर्तारः परमेष्ठ्यादयो, देवता मन्त्रान्तर्भूता अग्न्यादिका हविर्भाजः स्तुतिभाजो वाऽनःशाखोखाशम्योपवेषकपालेध्मोलूखलादयश्च प्रतिमाभूताश्छन्दांसि गायत्र्यादीन्येतान्यविदित्वा योऽधीतेऽनुब्रूते, जपति, जुहोति, यजते, याजयते, तस्य ब्रह्म निर्वीर्यं यातयामं भवत्यथान्तराश्वगर्ते वा पद्यते, स्थाणुं वर्च्छति, प्रमीयते वा, पापीयान् भवत्यथ विज्ञायैतानि योऽधीते, तस्य वीर्यवदथ योऽर्थवित् तस्य वीर्यवत्तरं भवति, जपित्वा हुत्वेष्ट्वा तत्फलेन युज्यते ॥ १ ॥

'इषे त्वादि खं ब्रह्मान्तं' विवस्वानपश्यत् । ततः प्रतिकर्मविभागेन ब्राह्मणानुसारेण ऋषयो वेदितव्याः, परमेष्ठी प्राजापत्यो दर्शपूर्णमासमन्त्राणां ऋषिर्देवा वा प्राजापत्याः । इषे त्वा शाखाऽनुष्टुब् विनियोगः कल्पकारोक्त, एवमूर्जे त्वा, वायवो वायव्यं, देवो

इषे त्वा० (अ० १।१)— ॐ खं ब्रह्म (अ. ४०।१७) पर्यन्तं विवस्वान् ऋषिः ।

[अथ दर्शपूर्णमासमंत्राः— अ. १—२।२८]

मंत्र		ऋषिः ।	देवता	छन्दः
१	इषे त्वा ।	परमेष्ठी प्राजापत्यः, देवाः प्राजापत्या वा	शाखा	अनुष्टुप्
	ऊर्जे त्वा ।	,,	,,	
	वायव स्थ ।	,,	वायुः	
	देवो वः सविता०	,,	इन्द्रः	

व ऐन्द्रं, यजमानस्य शाखा, वसोर्वायव्यं, द्यौर्मातरिश्वन उखा, वसोर्वायव्यं, देवस्त्वा पयः, कामधुक्षः प्रश्नः, सा विश्वायुस्त्रीणि गव्यानीन्द्रस्यैन्द्रं, विष्णो पयः ॥ २ ॥ [य० अ० १ मं० १-४]

अग्न इदमाग्नेये ॥ कस्त्वा प्राजापत्यं, कर्मणे सुक्शूर्प, प्रत्युष्टं द्वे राक्षसे, उरु ब्रह्म रक्षोघ्नꣳ सर्वत्र, धूरसि धूर्देवानां विष्णुस्त्वाऽन, उरु हविष्या, अपहतꣳ रक्षो, यच्छन्ताꣳ हविष्या, देवस्य त्वा सावित्रꣳ सर्वत्राऽग्नये लिङ्गोक्ते, भूताय त्वा हविः, स्वः सूर्यो, दृꣳहन्तां गृहाः, पृथिव्यास्त्वा हव्यं, पवित्रे लिङ्गोक्तꣳ, सवितुर्देवीः प्रोक्षिता

	यजमानस्य पशून्पाहि ।	,,	शाखा
२	वसोः पवित्रमसि ।	,,	वायुः
	द्यौरसि पृथिव्यसि । मातरिश्वनो०	,,	उखा
३	वसोः पवित्रमसि०	,,	वायुः
	देवस्त्वा सविता०	,,	पयः
	कामधुक्षः ?	,,	(प्रश्नः)
४	सा विश्वायुः । सा विश्वकर्मा०	,,	गौः
	इन्द्रस्य त्वा भागꣳ०	,,	इन्द्रः
	विष्णो हव्यꣳ रक्ष ।	,,	पयः
५	अग्ने व्रतपते० इदमह०	,,	अग्निः
६	कस्त्वा युनक्ति०	,,	प्रजापतिः
	कर्मणे वां वेषाय वाम् ।	,,	स्रुक्, शूर्पम्
७	प्रत्युष्टꣳ रक्षः० निष्टप्तꣳरक्षो०	,,	रक्षः
	उर्वन्तरिक्षमन्वेमि ।	,,	ब्रह्म रक्षोघ्नम्
८	धूरसि धूर्व धूर्वन्तं०	,,	धूः
	देवानामसि वह्नितमं०	,,	अनः
९	अच्छुतमसि हविर्धानं०	,,	,,
	विष्णुस्त्वा क्रमताम् ।	,,	,,
	उरु वाताय ।	,,	हविः
	अपहतꣳ रक्षः ।	,,	रक्षः
	यच्छन्तां पञ्च ।	,,	हविः
१०	देवस्य त्वा सवितुः०	,,	सविता
	अग्नये जुष्टं० अग्नीषोमाभ्यां०	,,	लिङ्गोक्ते
११	भूताय त्वा नारातये० ।	,,	हविः
	स्वरभिविख्येषम् ।	,,	सूर्यः
	दृꣳहन्तां दुर्याः ।	,,	गृहाः

आपान्यग्नये लिङ्गोक्ते, देव्याय पात्राणि ॥ ३ ॥ [य० अ० १ मं० ५–१३]

शर्मास्यदित्याःकृष्णाजिनमवधूतꣳ राक्षसमद्रिर्ग्रावोलूखले, अग्नेर्हविर्बृहत्स इदं मौसले, हविष्कृदधिदैवतं वागधियज्ञं पत्नी, कुकुटो वाग्, वर्षवृद्धꣳ शूर्पं, प्रति त्वा हविः, परापूतमपहतꣳ राक्षसे, वायुर्वो देवो वस्तण्डुला, धृष्टिरुपवेषोऽपाग्न आ देवयजमाग्नेये, ध्रुवमसि षण्णां कपालान्यग्ने ब्रह्माग्नेयं, धिषणासि दार्षदं, दिवः शम्या,

	पृथिव्यास्त्वा०	,,	हव्यम्
१२	पवित्रे स्थो वैष्णव्यौ ।	,,	लिङ्गोक्ता
	सवितुर्वः प्रसव०	,,	आपः ।
	देवीरापो अग्रेगुवोऽग्रे०	,,	,,
१३	युष्माऽइन्द्रो० प्रोक्षिता स्थ ।	,,	,,
	अग्नये त्वा जुष्टं प्रोक्षाम्य०	,,	लिङ्गोक्ता
	दैव्याय कर्मणे शुन्धध्वं०	,,	पात्राणि
१४	शर्मास्यवधूतꣳ रक्षो०	,,	कृष्णाजिनम्
	अदित्यास्त्वगसि०	,,	,,
	अवधूतꣳ रक्षो०	,,	रक्षः
	अद्रिरसि वानस्पत्यः ।	,,	उलूखलम्
	ग्रावासि पृथुबुध्नः०	,,	,,
१५	अग्नेस्तनूरसि वाचो विसर्जनं०	,,	हविः
	बृहद्ग्रावासि वानस्पत्यः ।	,,	मुसलम्
	स इदं देवेभ्यः०	,,	,,
	हविष्कृदेहि हविष्कृदेहि ।	,,	(अधिदैवतं) वाक्, (अधियज्ञं) पत्नी
१६	कुक्कुटोऽसि मधुजिह्व०	,,	वाक्
	वर्षवृद्धमसि ।	,,	शूर्पम्
	प्रति त्वा वर्षवृद्धं वेत्तु ।	,,	हविः
	परापूतꣳ रक्षः परापूताऽअरातयः ।	,,	रक्षः
	अपहतꣳ रक्षः ।	,,	,,
	वायुर्वो विविनक्तु ।	,,	तण्डुलाः
	देवो वः सविता हिरण्यपाणिः ०	,,	,,
१७	धृष्टिरसि ।	,,	उपवेषः
	अपाग्ने अग्निमामादं जहि०	,,	अग्निः
	आ देवयजं वह ।	,,	,,
	ध्रुवमसि पृथिवीं दꣳह०	,,	कपालानि
१८	अग्ने ब्रह्म गृभ्णीष्व०	,,	अग्निः

धिषणौपलं, धान्यमसि पण्णाꣳ हविर्महीनामाज्यम् ॥४॥ [य०अ०१ मं० १४-२०]

संवपामि हविः, समाप आपं, जनयत्यै त्वेदꣳ हविरिषे त्वाज्यं, धर्मोऽसि पण्णां पुरोडाशस्त्रिताय त्रयाणां त्रितो द्वित एकतः क्रमेणादद इन्द्रस्य स्फ्यः, पृथिवि वेदिर्व्रजं पुरीषं, वर्षतु वेदिर्बधान सावित्रमपाररुमररो आसुरे, द्रप्सस्ते वेदिर्गायत्रेण त्रीणि वैष्णवानि, सुक्ष्मा त्रयाणां वेदिः, पुराऽघशꣳसोऽपश्यच्चान्द्रमसीं त्रिष्टुभं, प्रोक्षणीः

[अ.१।१४] १९	शर्मास्यव० अदित्या०	,,	[कृष्णाजिनम्।]
	धिषणासि पर्वती०	,,	दृषत्
	दिवः स्कम्भनीरसि।	,,	शम्या
	धिषणासि पार्वतेयी०	,,	उपलः
२०	धान्यमसि धिनुहि देवान्	,,	हविः
	महीनां पयोऽसि।	,,	आज्यम्
[अ.१।१०] २१	देवस्य त्वा०	,,	[सविता।]
	संवपामि।	,,	हविः
	समाप ओषधीभिः ०	,,	आपः
२२	जनयत्यै त्वा संयौमि।	,,	हविः
	इदमग्नेरिदमग्नीषोमयोः।	,,	,,
	इषे त्वा।	,,	आज्यम्
	धर्मोऽसि विश्वायुरुरुप्रथा०	,,	पुरोडाशः
२३	मा भेर्मा संविक्था०	,,	,,
	त्रिताय त्वा।	,,	त्रितः
	द्विताय त्वा।	,,	द्वितः
	एकताय त्वा।	,,	एकतः
[अ.१।१०] २४	देवस्य त्वा०	,,	[सविता।]
	आददेऽध्वरकृतं देवेभ्यः।	,,	स्फ्यः
	इन्द्रस्य बाहुरसि दक्षिणः०	,,	,,
२५	पृथिवि देवयजन्यास्ते मूलं०	,,	वेदिः
	व्रजं गच्छ गोष्ठानं।	,,	पुरीषम्
	वर्षतु ते द्यौः।	,,	वेदिः
	बधान देव सवितः परमस्यां०	,,	सविता
२६	अपाररुं पृथिव्यै देवयजनाद्ध्यासं०	,,	असुरः
	अररो दिवं मा पप्तो०	,,	,,
	द्रप्सस्ते द्यां मा स्कन्०	,,	वेदिः
२७	गायत्रेण त्वा छन्दसा०	,,	विष्णुः

प्रैषो, द्विषत आभिचारिकमानिशितः स्रुवोऽनिशिता स्रुगादित्यै विष्णोर्योक्त्रमूर्जे त्रयाणामाज्यꣳ, सवितुरापं, तेजोऽसि धामाज्यम् ॥ ५ ॥ [य० अ० १ मं० २१–३१]

इति० संहितायां प्रथमोऽध्यायः ॥ १ ॥

कृष्णोऽसीध्मो, वेदिर्बर्हिर्लिङ्गोक्ते, अदित्या आपं, विष्णोः प्रास्तरमूर्णम्रदसं वेदिर्भुवपतये त्रीण्याग्नेयानि, गन्धर्वस्त्रयाणां परिधयो, वीतिहोत्रं विश्वावसुराग्नेयीं गायत्रीꣳ, समिदाग्नेयꣳ, सूर्यस्त्वा लिङ्गोक्तꣳ, सवितुर्विधृती, ऊर्णम्रदसमा त्वा प्रास्तरे, घृताच्यसि

	सुक्ष्मा चासि शिवा चासि०	,,	वेदिः	
२८	पुरा क्रूरस्य विसृपो विरप्शिन्०	,, अघशंसः ।	चन्द्रमाः	त्रिष्टुप्
	प्रोक्षणीरासादय ।	,,	(प्रैषः)	
	द्विषतो वधोऽसि ।	,,	आभिचारिकम्	
[अ. १ । ७] २९	प्रत्युष्टꣳ० निष्टप्तꣳ०	,,	[रक्षः]	
	अनिशितोऽसि सपत्नक्षित्०	,,	स्रुवः	
[अ० १ । ७]	प्रत्युष्टꣳ रक्षः०	,,	[रक्षः]	
	अनिशितासि सपत्नक्षित्०	,,	स्रुक्	
३०	अदित्यै रास्नासि ।	,,	योक्त्रम्	
	विष्णोर्वेष्योऽसि ।	,,	,,	
	ऊर्जे त्वा दब्धेन त्वा०	,,	आज्यम्	
३१	सवितुस्त्वा प्रसव उत्पुना०	,,	आपः	
	तेजोऽसि शुक्रमस्यमृतमसि ।	,,	आज्यम्	
	धाम नामासि प्रियं देवाना०	,,	,,	

अथ० संहितायां द्वितीयोऽध्यायः ।

१	कृष्णोऽस्याखरेष्टो०	परमेष्ठी प्राजापत्यः, देवाः प्राजापत्याः वा ।	इध्मः	
	वेदिरसि बर्हिषे त्वा जुष्टां	,,	लिङ्गोक्ता	
	बर्हिरसि स्रुग्भ्यस्त्वा०	,,	,,	
२	अदित्यै व्युन्दनमसि ।	,,	आपः	
	विष्णो स्तुपोऽसि ।	,,	प्रस्तरः	
	ऊर्णम्रदसं त्वा स्तृणामि०	,,	वेदिः	
	भुवपतये स्वाहा०	,,	अग्निः	
३	गन्धर्वस्त्वा विश्वावसु०	,,	परिधयः	
४	वीतिहोत्रं त्वा कवे०	,, विश्वावसुः	अग्निः	गायत्री
५	समिदसि ।	,,	,,	
	सूर्यस्त्वा पुरस्तात्पातु०	,,	लिङ्गोक्ता	
	सवितुर्बाहू स्थ ।	,,	विधृती	

त्रयाणां जुहूपभृद्ध्रुवाः क्रमेण, प्रियेण हविर्ध्रुवा असदन् पाहि मां वैष्णवे, अग्ने वाजजिदाग्नेयं, नमो दैवꣳ, स्वधा पित्र्यꣳ, सुयमे स्रुचावंघ्रिणा वैष्णवं, वसुमतीमाग्नेयमित ऐन्द्रꣳ, संज्योतिषाज्यं, मयीदमाशीःप्रतिग्रहणमुपहूता द्यावापृथिव्यम् ॥ ६ ॥ [य० अ० २ मं० १-११]

'ब्रह्मत्वं प्रतिष्ठान्तं' बृहस्पतिराङ्गिरसोऽपश्यदग्नेष्ट्वा प्राशित्रमेतं ते वैश्वदेवमेषा तेऽनुष्टुवाग्नेय्यग्ने वाजजिदाग्नेयमग्नीषोमयोश्चत्वारि लिङ्गोक्तानि, वसुभ्यस्त्रयाणां परिधयः, सं-

	ऊर्णम्रदसं० आ त्वा वसवो०	,,			प्रस्तरः
६	घृताच्यसि जुहूर्नाम्ना०	,,			जुहूः
	घृताच्यस्युपभृन्नाम्ना०	,,			उपभृत्
	घृताच्यसि ध्रुवा नाम्ना०	,,			ध्रुवाः
	प्रियेण धाम्ना प्रियꣳ सद०	,,			हविः
	ध्रुवाऽसदन्नृतस्य योनौ०	,,			विष्णुः
	पाहि मां यज्ञन्यम्०	,,			,,
७	अग्ने वाजजिद्वाजं त्वा०	,,			अग्निः
	नमो देवेभ्यः ।	,,			देवाः
	स्वधा पितृभ्यः ।	,,			पितरः
	सुयमे मे भूयास्तम् ।	,,			स्रुचौ
८	अस्कन्नमद्य देवेभ्य०	,,			,,
	अंघ्रिणा विष्णो मा त्वावक्रमिषम् ।	,,			विष्णुः
	वसुमतीमग्ने ते छायामुप०	,,			अग्निः
	इतऽइन्द्रो वीर्यमकृणोत्०	,,			इन्द्रः
९	अग्ने वेहोत्रं०	,,			,,
	सं ज्योतिषा ज्योतिः ।	,,			आज्यम्
१०	मयीदमिन्द्रऽइन्द्रियं०	,,			आशीः प्रतिग्रहणम्
	उपहूता पृथिवि मातोप०	,,			पृथिवी
११	उपहूतो द्यौ०	,,			द्यौः
[ब्रह्मत्वं—	देवस्य त्वा०	,,	बृहस्पतिः आंगिरसः		[सविता]
	अग्नेष्ट्वास्येन प्राश्नामि ।	,,	,,	,,	प्राशित्रम्
१२	एतं ते देव०	,,	,,	,,	विश्वेदेवाः
-ब्रह्मत्वं समाप्तं]	१३ मनो जूतिर्जुषतामाज्यस्य०	,,	,,	,,	,,
१४	एषा तेऽअग्ने समित्०	,,			अग्निः अनुष्टुप्
	अग्ने वाजजिद्वाजं त्वा०	,,			,,
१५	अग्नीषोमयो० अग्नीषोमौ०	,,			लिङ्गोक्ता

जानाथां व्यन्तु प्रास्तरे, मरुतां कपिर्बृहतीं प्रास्तरीमन्त्यः पाद आग्नेयो, यं परिधिं देवल आग्नेयीं त्रिष्टुभं विराड्रूपां यजुरन्तामग्नेः प्रियं यजुः, सꣳस्रवभागाः सोमशुष्मो वैश्वदेवीं त्रिष्टुभं यजुरन्ताꣳ, स्वाहा वाडध्यर्जुर्घृताची स्रुचौ, यज्ञ नमः शूर्प यवमान्कृपिरुद्गालवान्धानान्तर्वानिति पञ्चार्षेयो यज्ञो देवताऽग्ने दग्धायो गार्हपत्योऽग्नये दक्षिणाग्निः, सरस्वत्यै लिङ्गोक्तं, वेदोऽसि वेदो, देवा मनसस्पतिर्वातदेवत्यां विराजꣳ, संबर्हिर्लिङ्गोक्ता त्रिष्टुब्विराड्रूपा, कस्त्वा प्राजापत्यꣳ, रक्षसाꣳ राक्षसम्॥७॥ [य०अ०२मं०११-२३]

अथ याजमानँ— सं वर्चसा त्वाष्ट्री त्रिष्टुब्, दिवि विष्णुस्त्रीणि वैष्णवान्यस्माद्वा-

	इन्द्राग्न्योरुज्जिति०	,,	लिङ्गोक्ता		
	इन्द्राग्नी तमपनुदतां०	,,	,,		
१६	वसुभ्यस्त्वा रुद्रेभ्यस्त्वा०	,,	परिधयः		
	संजानाथां० व्यन्तु वयोक्तꣳ०	,,	प्रस्तरः		
	मरुतां पृषतीर्गच्छ०	,, कपिः ।	,,	बृहती	
	चक्षुष्पा अग्नेऽसि चक्षुर्मे पाहि ।	,, ,,	अग्निः	,,	
१७	यं परिधिं पर्यधत्था०	,, देवलः ।	,,	विराड्रूपा त्रिष्टुप्	
	अग्नेः प्रियं पाथोऽपीतम् ।	,, ,,	,,	(यजुरन्ताः)	
१८	सꣳस्रवभागा स्थेषा०	,, सोमशुष्मः	विश्वेदेवाः	त्रिष्टुप् (यजुरन्ता)	
	स्वाहा वाड् ।	,, ,,	,,	यजुः	
१९	घृताची स्थो०	,,	स्रुचौ		
	यज्ञ नमश्च त उप च०	शूर्पं, यवमान्, कृपिः, उद्गालवान्, धानान्तर्वान्	यज्ञः		
२०	अग्नेऽदग्धायोऽशीतम	परमेष्ठी प्राजापत्यः देवाः प्राजापत्या वा	गार्हपत्यः		
	अग्नये संवेशपतये स्वाहा०	,,	दक्षिणाग्निः		
	सरस्वत्यै यशोभगिन्यै स्वाहा ।	,,	लिङ्गोक्ता		
२१	वेदोऽसि येन त्वं देव वेद०	,,	वेदः		
	देवा गातुविदो गातुं वित्वा०	,, मनसस्पतिः	वातः	विराट्	
२२	संबर्हिरक्तां हविषा घृतेन०	,,	लिङ्गोक्ता	विराड्रूपा त्रिष्टुप्	
२३	कस्त्वा विमुञ्चति स त्वा०	,,	प्रजापतिः		
	रक्षसां भागोऽसि ।	,,	रक्षः		
"याजमानं"– २४	सं वर्चसा पयसा०	,,	त्वष्टा	त्रिष्टुप्	
२५	दिवि विष्णुर्व्यक्रꣳस्त०	,,	विष्णुः		
	अस्मादन्नात् ।	,,	भागः		
	अस्यै प्रतिष्ठायै ।	,,	भूमिः		

गोऽस्यै भूमिरगन्म दैवꣳ, सं ज्योतिषाहवनीयः, स्वयंभूः सूर्यस्य सौरे, अग्ने गृहपते गार्हपत्यः, सूर्यस्य सौरमग्न इदमाग्नेये ॥ ८ ॥ [य० अ० २ मं० २४-२८]

पितृयज्ञः – प्रजापतेरार्षमग्नये सोमाय द्वे दैवे स्वाहाकारश्रुतेरपहता आसुरं, ये रूपाणि कव्यवाहनोऽग्निस्त्रिष्टुबत्रामी मदन्त पित्र्ये, नमो वः पड् लिङ्गोक्तानि, परे पित्र्ये, आधत्त पित्र्या गायत्र्यूर्जमापी विराट् ॥ ९ ॥ [य० अ० २ मं० २९-३४]

इति० संहितायां द्वितीयोऽध्यायः ॥ २ ॥

अग्न्याधेयं-- प्रजापतेरार्षं देवानामग्नेर्गन्धर्वाणां वा, समिधाग्नेऽयश्चतस्रो गायत्र्यः, समिधा विरूप आङ्गिरसः, सुसमिद्धाय वसुश्रुतस्तं त्वा भरद्वाजो, भूर्भुवस्त्रिस्रो महा-

---

	अगन्म स्वः ।	,,	देवाः	
	सं ज्योतिषाभूम ।	,,	आहवनीयः	
२६	स्वयम्भूरसि० । सूर्यस्यावृत०	,,	सूर्यः	
२७	अग्ने गृहपते सुगृहपति०	,,	गार्हपत्यः	
	सूर्यस्यावृतमन्वावर्ते ।	,,	सूर्यः	
२८	अग्ने व्रतपते० इदमहं०	,,	अग्निः	

[इति दर्शपूर्णमासेष्टिमन्त्राः समाप्ताः । अतः परं पिण्डपितृयज्ञमन्त्राः ।]

२९	अग्नये कव्य०सोमाय पितृ०	प्रजापतिः	देवाः	
	अपहता रक्षाꣳसि वेदिषदः ।	,,	असुराः	
३०	ये रूपाणि प्रतिमुञ्चमानाः०	,,	कव्यवाहनोऽग्निः	त्रिष्टुप्
३१	अत्र पितरो० । अमीमदन्त०	,,	पितरः	
३२	नमो वः पितरो रसाय०	,,	लिङ्गोक्तानि	
	नमो वः पितरः पितरो०	,,	पितरः	
३३	आधत्त पितरो गर्भं०	,,	,,	गायत्री
३४	ऊर्जं वहन्तीरमृतं०	,,	आपः	विराट्

[इति पिण्डपितृयज्ञमन्त्राः समाप्ताः ।]

अथ० संहितायां तृतीयोऽध्यायः ।

[अग्न्याधेयं अ० ३ मं० १—८]

१	समिधाग्निं ०	प्रजापतिः, देवाः, अग्निः, गंधर्वा वा	विरूप आंगिरसः	अग्निः	गायत्री
२	सुसमिद्धाय शोचिषे०	,,	वसुश्रुतः	,,	,,
३	तं त्वा समिद्भिरङ्गिरो०	,,	भरद्वाजः	,,	,,
४	उप त्वाग्ने हविष्मती०	,,		,,	,,
महाव्याहृतयः ५	भूः	,,		,,	
	भुवः	,,		वायुः	
	स्वः	,,		सूर्यः	

व्याहृतयोऽग्निवायुसूर्यदेवत्याः क्रमेण, द्यौरिव यजमानाशीर्लिङ्गोक्तदेवताऽऽयं गौः सार्पराज्ञ्यस्तृचो गायत्रोऽग्निः परावररूपेण देवता ॥ १० ॥ [अ० ३ मं० १–८]

अग्निहोत्रं– प्रजापतेरार्षमग्निर्ज्योतिः सप्त लिंगोक्तदेवता गायत्र्य आद्याः पञ्चैकपदा अग्निर्वर्चो द्वे तक्षाऽपश्यत्परां जीवलश्चैलकिः ॥ ११ ॥ [अ० ३ मं० ९–१०]

यजमानाग्न्युपस्थानं बृहद्देवानामार्षमुपप्रयन्त इत्यनुवाक आद्ये द्वे आग्नेय्यौ गायत्र्यावुपवत्या गोतमो राहूगणो, मूर्धन्वत्या विरूप, उभा वां भरद्वाज ऐन्द्राग्नीं त्रिष्टुभमयं ते देवश्रवा देववातश्च भारतावाग्नेयीमनुष्टुभमयमिह वामदेवो जगतीमस्य प्रत्नामवत्सारो गव्यां वाग्नेयीं वा पयोदेवत्यां वा गायत्रीं, तनूपा आग्नेयानीन्धाना आग्नेयी महापंक्तिस्त्र्यवसाना ॥ १२ ॥ [अ० ३ । ११–१८]

	द्यौरिव भूम्ना पृथिवीव वरिम्णा०	,,	(यजमानाशीः) लिङ्गोक्ता	
६	आयं गौः पृश्निरक्रमीत्०	,, सर्पराज्ञी	अग्निः	गायत्री
७	अन्तश्चरति रोचनास्य०	,, ,,	,,	,,
८	त्रिꣳशद्धाम विराजति०	,, ,,	,,	,,

[इत्यग्न्याधेयमन्त्राः ।]

[अथ अग्निहोत्रमन्त्राः— अ० ३ मं० ९—१०]

९	अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा ।	प्रजापतिः	लिङ्गोक्ता	एकपदा गायत्री
	सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा ।	,,	,,	,,
	अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा ।	,, तक्षा	,,	,,
	सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा ।	,, ,,	,,	,,
	ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा	,, जीवलश्चैलकिः	,,	,,
१०	सजूर्देवेन सवित्रा सजू०	,,	,,	गायत्री

[इत्यग्निहोत्रमन्त्राः ।]

[अथ यजमानाग्न्युपस्थानं बृहत् (बृहदुपस्थानम्)— अ० ३ मं० ११—३६]

११	उपप्रयन्तोऽअध्वरं०	देवाः, गोतमो राहूगणः	अग्निः	,,
१२	अग्निर्मूर्धा दिवः०	,, विरूपः	,,	,,
१३	उभा वामिन्द्राग्नी०	,, भरद्वाजः	इन्द्राग्नी	त्रिष्टुप्
१४	अयं ते योनिर्ऋत्वियो०	,, देवश्रवादेववातौ भारतौ	अग्निः	अनुष्टुप्
१५	अयमिह प्रथमोऽधायि०	,, वामदेवः	,,	जगती
१६	अस्य प्रत्नामनुद्युतꣳ०	,, अवत्सारः	गौः,अग्निः,पयः वा	गायत्री
१७	तनूपाऽअग्नेऽसि०	,,	अग्निः	
१८	इन्धानास्त्वा शतꣳ हिमा०	,,	,,	महापंक्तिः (त्र्यवसाना)

चित्रावसो रात्रिदेवत्यमृषयोऽपश्यन्, सं त्वमाग्नेयमन्ध स्थ रेवतीः सꣳहितेति त्रीणि गव्यान्युप त्वाग्नेयं तृचं गायत्रं मधुच्छन्दा वैश्वामित्रोऽग्ने त्वं चतस्रो द्विपदाऽऽग्नेयीर्बन्धुः, सुबन्धुः, श्रुतबन्धुर्विप्रबन्धुरेकैकश, इडे काम्या गव्ये, सोमानं ब्राह्मणस्पत्यं तृचं गायत्रं ब्रह्मणस्पतिर्मेधातिथिर्वा, महि त्रीणाꣳ सत्यधृतिर्वारुणिरादित्यदैवतं तृचं गायत्रं पथिस्वस्त्ययनं, कदाचनैन्द्रीं पथ्याबृहतीं मधुच्छन्दास्तत्सवितुर्विश्वामित्रः सावित्रीं गायत्रीं, परि ते वामदेव आग्नेयीमनिरुक्तां गायत्रीम् ॥ १३ ॥ [अ० ३ मं० १८-३६]

क्षुल्लकोपस्थानमासुरेरार्षं भूर्भुवः स्वः, प्रवत्स्यदुपस्थानमागतोपस्थानं चादित्य-

	चित्रावसो स्वस्ति ते पारमशीय।	,, ऋषयः	रात्रिः	
१९	सं त्वमग्ने सूर्यस्य०	,,	अग्निः	
२०	अन्ध स्थान्धो वो भक्षीय०	,,	गौः	
२१	रेवती रमध्वमस्मिन्योना०	,,	,,	
२२	सꣳहितासि विश्वरूप्यूर्जा०	,,	,,	
	उप त्वाग्ने दिवेदिवे०	,, मधुच्छन्दा वैश्वामित्रः	अग्निः	गायत्री
२३	राजन्तमध्वराणां०	,, ,,	,,	,,
२४	स नः पितेव सूनवे०	,, ,,	,,	,,
२५	अग्ने त्वं नोऽअन्तम०	,, बन्धुः	,,	द्विपदाविराट्
	वसुरग्निर्वसुश्रवा०	,, सुबन्धुः	,,	,,
२६	तं त्वा शोचिष्ठ दीदिवः०	,, श्रुतबन्धुः ,,	,,	,,
	स नो बोधि श्रुधी हव०	,, विप्रबन्धुः	,,	,,
२७	इडऽएह्यदित एहि। काम्या०	,,	गौः	
२८	सोमानꣳ स्वरणं०	,, ब्रह्मणस्पतिः, मेधातिथिःवा	ब्रह्मणस्पतिः	गायत्री
२९	यो रेवान्योऽअमीवहा०	,, ,, ,,	,,	,,
३०	मा नः शꣳसोऽअररुषो०	,, ,, ,,	,,	,,
[अथ पथिस्वस्त्ययनम् — अ० ३ मं० ३१—३३]				
३१	महि त्रीणामवोऽस्तु०	,, सत्यधृतिर्वारुणिः	आदित्यः	गायत्री
३२	नहि तेषाममा चन०	,, ,,	,,	,,
३३	ते हि पुत्रासोऽअदितेः०	,, ,,	,,	,,
[इति पथिस्वस्त्ययनम्]				
३४	कदा चन स्तरीरसि०	,, मधुच्छन्दाः	इन्द्रः	पथ्याबृहती
३५	तत्सवितुर्वरेण्यं०	,, विश्वामित्रः	सविता	गायत्री
३६	परि ते दूढभो रथो०	,, वामदेवः	अग्निः	गायत्री
[इति बृहदुपस्थानं समाप्तम्। अथ क्षुल्लकोपस्थानम्— अ० ३ मं० ३७ पूर्वार्धः।]				(अनिरुक्ता)
३७	भूर्भुवः स्वः सुप्रजाः प्रजाभिः०	आसुरिः	अग्निः	

स्यार्षं, नर्य गार्हपत्यः, शंस्याहवनीयोऽथर्य दक्षिणाग्निरागन्माहवनीयोऽनुष्टुवयमग्निर्न्यंकुसारिणी बृहती गार्हपत्यो,ऽयमग्निरन्वाहार्यपचनोऽनुष्टुव्, गृहा मा त्रिष्टुव् विराड्रूपा, येषामनुष्टुवुपहूता महापंक्तिस्त्र्यवसाना तिस्रोऽपि वास्तवीः शंयुर्बार्हस्पत्यः ॥ १४ ॥ [अ०३ मं० ३७–४३]

चातुर्मास्यानि– प्रजापतेरार्षं, प्रघासिनो मारुती गायत्री, यद्ग्रामे मारुत्यनुष्टुवनिरुक्ता, मो षू णोऽगस्त्य ऐन्द्रामारुतीं विराजमक्रन्ननिरुक्ताग्नेय्यनुष्टुवबभृथ यज्ञदैवतं, पूर्णा दर्वि द्वे और्णवाभ ऐन्द्यावनुष्टुभावक्षन् द्वे गोतम ऐन्द्र्यौ पंक्ती, मनो नु मानसं तृचं

[प्रवत्स्यदुपस्थानं आगतोपस्थानं च अ० ३ मं०३७ द्वितीयार्धात् मं० ४३ पर्यन्तम् ।]

	नर्य प्रजां मे पाहि ।	आदित्यः	गार्हपत्यः	
	शंस्य पशून्मे पाहि ।	,,	आहवनीयः	
	अथर्य पितुं मे पाहि ।	,,	दक्षिणाग्निः	
३८	आगन्म विश्ववेदस०	,,	आहवनीयः	अनुष्टुप्
३९	अयमग्निर्गृहपति०	,,	गार्हपत्यः	बृहती (न्यंकुसारिणी)
४०	अयमग्निः पुरीष्यो०	,,	अन्वाहार्यपचनः	अनुष्टुप्
४१	गृहा मा बिभीत०	,, शंयुः बार्हस्पत्यः	वास्तुः	त्रिष्टुप् (विराड्रूपा)
४२	येषामध्येति प्रवस०	,, ,,	,,	अनुष्टुप्
४३	उपहूता इह गाव०	,, ,,	,,	त्र्यवसाना महापंक्तिः

[इत्युपस्थानमन्त्राः समाप्ताः]

[चातुर्मास्यानि । अ० ३ मं० ४४—६३]

४४	प्रघासिनो हवामहे०	प्रजापतिः	मरुतः	गायत्री
४५	यद्ग्रामे यदरण्ये०	,,	,,	अनुष्टुप् अनिरुक्ता
४६	मो षू णऽइन्द्रात्र०	,, अगस्त्यः	इन्द्रामरुतौ	विराट्
४७	अक्रन् कर्म कर्मकृतः०	,,	अग्निः	अनिरुक्ताअनुष्टुप्
४८	अवभृथ निचुम्पुण०	,,	यज्ञः	
४९	पूर्णा दर्वि परापत०	,, और्णवाभः	इन्द्रः	अनुष्टुप्
५०	देहि मे ददामि ते०	,, ,,	,,	,,
५१	अक्षन्नमीमदन्त०	,, गोतमः	इन्द्रः	पंक्तिः
५२	सुसन्दृशं त्वा वयं०	,, ,,	,,	,,
५३	मनो न्वाह्वामहे०	,, बन्धुः	मनः	गायत्री
५४	आ नऽएतु मनः पुनः०	,, ,,	,,	,,
५५	पुनर्नः पितरो मनो०	,, ,,	,,	,,

बन्धुर्गायत्रं, वयꣳ सौमीं गायत्रीं बन्धुरेष ते द्वे रौद्रे, अवरुद्रꣳ रौद्र्यावेका पंक्तिरपरा ककुप्, त्र्यम्बकं द्वे अनुष्टुभौ पूर्वस्यां वसिष्ठ, एतदास्तारपंक्तिस्त्र्यायुषं नारायण उष्णिहं यजमानाशिषंꣳ शिवो नाम क्षौरं, निवर्तयामि लिङ्गोक्तदेवतमाशीःप्रायम् ॥ १५ ॥ [अ० ३ मं० ४४--६३]

इति० संहितायां तृतीयोऽध्यायः ॥

अग्निष्टोमः— प्रजापतेरार्षमेदं द्वे अत्यष्टी त्र्यवसाने आद्यावर्धचौ देवयजनदेवत्याविमा आप ओषधे कुशतरुणꣳ, स्वधिते क्षुरमापो अस्मानापं, दीक्षातपसोर्वासो, महीनां नवनीतं, वृत्रस्याञ्जनं, चित्पतिर्द्वे प्राजापत्ये, देवो मा सावित्रमा वो दैव्यनुष्टुबाशीः,

५६	वयꣳ सोम व्रते तव	,,	,,	सोमः	,,
५७	एष ते रुद्र भागः सह०	,,		रुद्रः	
	एष ते रुद्र भागऽआखुस्ते पशुः ।	,,		,,	
५८	अव रुद्रमदीमह्यव०	,,		,,	पंक्तिः
५९	भेषजमसि भेषजं०	,,		,,	ककुप्
६०	त्र्यम्बकं यजामहे सुगन्धिं पुष्टि०	,,	वसिष्ठः	,,	अनुष्टुप्
	,, ,, ,, पति०	,,		,,	,,
६१	एतत्ते रुद्रावसं०	,,		,,	आस्तारपंक्तिः
६२	त्र्यायुषं जमदग्नेः०	,,	नारायणः	यजमानाशीः	उष्णिक्
६३	शिवो नामासि०	,,		क्षुरः	
,,	निवर्तयाम्यायुषे०	,,		लिङ्गोक्तदेवतं आशीःप्रायम्	

[इति चातुर्मास्यानि ।]

अथ० संहितायां चतुर्थोऽध्यायः ।

[अथ अग्निष्टोमः । अ० ४ । १ — अ० ८ । ३२ पर्यन्तम्]

१	एदमगन्म देवयजनं०	प्रजापतिः	देवयजनम्	त्र्यवसाना अत्यष्टिः
	ऋक्सामाभ्याꣳ सन्तरन्तो०	,,	,,	,,
	इमा आपः शमु मे सन्तु देवीः ।	,,	कुशतरुणम्	
	ओषधे त्रायस्व ।	,,	,,	
	स्वधिते मैनꣳ हिꣳसीः ।	,,	क्षुरम्	
२	आपोऽ अस्मान्मातरः०	,,	आपः	
	दीक्षातपसोस्तनूरसि०	,,	वासः	
३	महीनां पयोऽसि०	,,	नवनीतम्	
	वृत्रस्याऽसि कनीनक०	,,	अञ्जनम्	
४	चित्पतिर्मा० वाक्पतिर्मा० ।	,,	प्रजापतिः	
	देवो मा सविता०	,,	सविता	
५	आ वो देवासऽईमहे०	,,	आशीः	दैवी अनुष्टुप्

स्वाहा यज्ञं चतुर्णां यज्ञ, आकूत्यै चतुर्णामौद्भभणानामग्निरापो देवीलिङ्गोक्तदेवता विराट् ॥ १६ ॥ [अ० ४ मं० १–७]

विश्वो देवस्य स्वस्त्यात्रेयः सावित्रीमनुष्टुभमृक्सामयोः कृष्णाजिने, शर्मासि कृष्णाजिनमूर्गस्यङ्गिरोभिर्दृष्टं मेखलꣳ, सोमस्य नीविर्विष्णोर्वास, इन्द्रस्य सुसस्याः कृष्णविषाणोच्छ्रयस्व दण्डो, व्रतं यज्ञो, दैवीं धीर्ये देवा वाक् प्राणोदानौ चक्षुःश्रोत्रमध्यात्ममग्निर्मित्रावरुणावादित्यो विश्वेदेवा अधिदैवतꣳ, श्वात्रा आपी जगतीयं ते लोष्टमपो मूत्रं पृथिव्या लोष्टमग्ने त्वमाग्नेय्यनुष्टुप्, पुनर्मन आग्नेयं, त्वमग्ने वत्स आग्नेयीं गायत्रीꣳ, रास्वेयत् सौम्यमेषा ते हिरण्याज्यदैवतं, जूरसि वाग्दैवतꣳ, शुक्रमसि हिरण्यं, चिदसि

	६	स्वाहा यज्ञं मनसः०	,,	यज्ञः	
[औद्भभणानि	७	आकूत्यै प्रयुजेऽग्नये०	,,	अग्निः	
अ. ४ मं. ७]		आपो देवीर्बृहतीः०	,,	लिङ्गोक्तदेवता	विराट्
	८	विश्वो देवस्य नेतु०	,, स्वस्त्यात्रेयः	सविता	अनुष्टुप्
	९	ऋक्सामयोः शिल्पे०	,,	कृष्णाजिने	
		शर्मासि शर्म मे यच्छ०	,,	कृष्णाजिनम्	
	१०	ऊर्गस्याङ्गिरस्यूर्णम्रदा०	,, अङ्गिरसः	मेखला	
		सोमस्य नीविरसि०	,, ,,	नीविः	
		विष्णोः शर्मासि०	,,	वासः	
		इन्द्रस्य योनिरसि । सुसस्याः०	,, ,,	कृष्णविषाणा	
		उच्छ्रयस्व वनस्पते०	,, ,,	दण्डः	
	११	व्रतं कृणुताग्नि०	,,	यज्ञः	
		दैवीं धियं मनामहे०	,,	धीः	शक्करी
		ये देवा मनोजाता०	,,	(अध्यात्मं)वाक्,प्राणोदानौ, चक्षुः, श्रोत्रम् (अधिदैवतं)अग्निः,मित्रावरुणौ, आदित्यः, विश्वेदेवाः	
	१२	श्वात्राः पीता भवत यूयमापो०	,,	आपः	जगती
	१३	इयं ते यज्ञिया तनूः ।	,,	लोष्टम्	
		अपो मुञ्चामि न०	,,	मूत्रम्	
		पृथिवीमा विशत०	,,	लोष्टम्	
	१४	अग्ने त्वꣳ सु जागृहि०	,,	अग्निः	अनुष्टुप्
	१५	पुनर्मनः पुनरायुर्म आगन्०	,,	,,	
	१६	त्वमग्ने व्रतपाऽसि०	,, वत्सः	,,	गायत्री
		रास्वेयत्सोमा भूयो भर०	,,	सोमः	

गौः सोमक्रयणी वाग्रूपाऽध्यारोपकल्पनया ॥ १७ ॥ [अ० ४ मं० ८-२०]

वस्व्यस्यनुष्टुब् बृहती वा सोमक्रयण्यास्तुतिरदित्या आज्यमस्मे पण्णां लिङ्गोक्ता देवताः, समख्ये पत्न्याशीरास्तारपंक्तिरेष ते लिङ्गोक्तदेवतमास्माकोऽसि सौम्यमभित्यꣳ सावित्र्यृष्टिः, प्रजाभ्यस्त्वा प्रजास्त्वा शुक्रं त्वा सौम्यानि, सग्मेऽस्मे लिंगोक्ते, तपसोऽर्द्धेऽजाऽर्द्धे सोमो, मित्रो न इन्द्रस्य सौम्ये, स्वानादीनि धिष्ण्यनामानि, परिमाऽऽग्नेयी पुरस्ताद्बृहती, प्रतिपन्थामनुष्टुप्पथिदेवत्याऽदित्याः कृष्णाजिनमदित्यै सौम्यमस्तभ्नात्

१७	एषा ते शुक्र तनू०	,,	हिरण्यं, आज्यम्	
	जूरसि धृता मनसा०	,,	वाक्	
१८	तस्यास्ते सत्यसवसः०	,,	,,	
	शुक्रमसि चन्द्रमस्यमृत०	,,	हिरण्यम्	
१९	चिदसि मनासि०	,,	वाग्रूपा गौः	
२०	अनु त्वा माता मन्यता०	,,	,,	
२१	वस्व्यस्यदितिरस्यादित्यासि०	,,	,,	अनुष्टुप् बृहती वा
२२	अदित्यास्त्वा मूर्धन्नाजिघर्मि०	,,	आज्यम्	
	अस्मे रमस्वास्मे ते०	,,	लिङ्गोक्ता	
२३	समख्ये देव्या धिया	,,	पत्न्याशीः	आस्तारपंक्तिः
२४	एष ते गायत्रो भाग०	,,	लिङ्गोक्ता	
	आस्माकोऽसि शुक्रस्ते०	,,	सोमः	
२५	अभि त्यं देवꣳ सवितार०	,,	सविता	अष्टिः
	प्रजाभ्यस्त्वा । प्रजास्त्वानु प्राणन्तु०	,,	सोमः	
२६	शुक्रं त्वा शुक्रेण क्रीणामि०	,,	,,	
	सग्मे ते गोः । अस्मे ते चन्द्रा० ।	,,	लिंगोक्ता	
	तपसस्तनूरसि प्रजापतेर्वर्णः	,,	अजा	
	परमेण पशुना क्रीयसे०	,,	सोमः	
२७	मित्रो नऽएहि सुमित्रधः ।	,,	,,	
	इन्द्रस्योरुमाविश०	,,	,,	
	स्वान भ्राजाङ्गारे बम्भारे०	,,	(धिष्ण्यनामान्येतानि सप्त)	
२८	परि माग्ने दुश्चरितात्०	,,	अग्निः	पुरस्ताद्बृहती
२९	प्रति पन्थामपद्महि०	,,	पन्थाः	अनुष्टुप्
३०	अदित्यास्त्वगासि ।	,,	कृष्णाजिनम्	
	अदित्यै सदऽआसीद ।	,,	सोमः	
	अस्तभ्नाद्द्यां वृषभो०	,,	वरुणः	त्रिष्टुप्
३१	वनेषु व्यन्तरिक्षं ततान०	,,	,,	,,

त्रिष्टुभौ वारुण्यौ, सूर्यस्यानुष्टुप् कृष्णाजिनमुस्रावूर्ध्ववृहत्यानडुही, भद्रो मे सौम्यं, नमो मित्रस्याभितपनः सूर्यः सौरीं जगतीं, वरुणस्य पञ्च वारुणानि, या ते सौमीं त्रिष्टुभं गोतमः ॥ १८ ॥ [अ० ४ मं० २१--३७]

इति० संहितायां चतुर्थोऽध्यायः ।

अग्नेस्तनूरसि पञ्च वैष्णवानि, अग्नेः शकलं, वृषणौ दर्भतरुणके, उर्वश्यसि त्रयाणां लिङ्गोक्ता देवता, गायत्रेण त्रीण्याग्नेयानि, भवतं नः पंक्तिरग्नावग्निर्विराडेतयोर्निर्मथ्याहवनीयावग्नी देवते, आपतये वायव्यमनाधृष्टमाज्यमग्ने व्रतपा आग्नेयमंशुरंशुः प्रकृतिश्चतुरवसाना सौम्यन्त्योऽर्धर्चो लिङ्गोक्तदेवतो, या ते त्रीण्याग्नेयानि, तन्नायनी चत्वारि पार्थिवानि, विदेदाग्नेयमग्ने अङ्गिरो योऽस्यामनु त्वा लिङ्गोक्तानि, सिंह्यसि त्रयाणां

३२	सूर्यस्य चक्षुरारोहाग्ने०	,,	कृष्णाजिनम्	अनुष्टुप्
३३	उस्रावेतं धूर्षाहौ०	,,	अनडुत्	ऊर्ध्ववृहती
३४	भद्रो मेऽसि प्रच्यवस्व०	,,	सोमः	
३५	नमो मित्रस्य वरुणस्य चक्षसे०	,, अभितपनः सूर्यः	सूर्यः	जगती
३६	वरुणस्योत्तम्भनमसि०	,,	वरुणः	
३७	या ते धामानि हविषा यजन्ति०	,, गोतमः	सोमः	त्रिष्टुप्

अथ संहितायां पञ्चमोऽध्यायः ।

१	अग्नेस्तनूरसि०	प्रजापतिः	विष्णुः	
२	अग्नेर्जनित्रमसि ।	,,	शकलम्	
	वृषणौ स्थ ।	,,	दर्भतरुणके	
	उर्वश्यसि । आयुरसि । पुरूरवा०	,,	लिङ्गोक्ता	
	गायत्रेण त्वा छन्दसा मन्थामि०	,,	अग्निः	
३	भवतं नः समनसौ०	,,	निर्मथ्याहवनीयौ अग्नी	पंक्तिः
४	अग्नावग्निश्चरति प्रविष्ट०	,,	,,	विराट्
५	आपतये त्वा परिपतये०	,,	वायुः	
	अनाधृष्टमस्यनाधृष्यं०	,,	आज्यम्	
६	अग्ने व्रतपास्त्वे व्रतपा०	,,	अग्निः	
७	अंशुरंशुष्टे देव०	,,	सोमः	चतुरवसाना प्रकृतिः
	एष्टा रायः प्रेषे भगाय० ।	,,	लिङ्गोक्ता	
८	या तेऽअग्नेऽयःशया तनूः०	,,	अग्निः	
९	तन्नायनी मेऽसि वित्तायनी०	,,	पृथिवी	
	विदेदग्निर्नभोनामाग्ने०	,,	अग्निः	
	अग्नेऽअङ्गिरऽआयुना नाग्नेहि० ।	,,	लिंगोक्ता	
	योऽस्यां पृथिव्यामसि०	,,	,,	
	अनु त्वा देववीतये०	,,	,,	

वेदिरिन्द्रघोषश्चतुर्णामुत्तरवेदिरिदमहमापश्च, सिꣳह्यसि पञ्चानां वाग्, भूतेभ्यः स्रुग्, ध्रुवोऽसि परिधयस्त्रयाणामग्नेः संभारा गुल्गुल्वादयः ॥ १९ ॥ [अ० ५ मं० १-१३]

युञ्जते श्यावाश्वः सावित्रीं जगतीमिदं विष्णुर्मेधातिथिर्वैष्णवीं गायत्रीमिरावती वसिष्ठस्त्रिष्टुभं, देवश्रुतावक्षधुरौ, प्राची स्वं गोष्टमत्र हविर्धाने, विष्णोर्नु तिस्रो वैष्णव्यस्त्रिष्टुभ आद्ये द्वे यजुरन्ते, विष्णोर्नु प्र त दीर्घतमा औतथ्यो, विष्णो रराटं पञ्च वैष्णवान्याददेऽभ्रिरिदमहꣳ रक्षोघ्नं, बृहन्नौपरवाणीदमहं पञ्च लिङ्गोक्तानि, स्वराडस्यौपरवाणि चत्वारि, रक्षोहणो वः सप्त वैष्णवानि, यवोऽसि यवो, दिवे त्वौदुम्बरी, शुन्धन्तां पित्र्ये,

१०	सिꣳह्यसि सपत्नसाही०	,,	वेदिः	
११	इन्द्रघोषस्त्वा वसुभिः०	,,	उत्तरवेदिः	
	इदमहं तꣳ वार्बहिर्धा०	,,	आपः	
१२	सिꣳह्यसि स्वाहा०	,,	वाक्	
	भूतेभ्यस्त्वा ।	,,	स्रुक्	
१३	ध्रुवोऽसि पृथिवीं दृꣳह०	,,	परिधयः	
	अग्नेः पुरीषमसि ।	,,	गुल्गुल्वादयः संभाराः	
१४	युञ्जते मनऽउत युञ्जते०	,, श्यावाश्वः	सविता	जगती
१५	इदं विष्णुर्विचक्रमे०	,, मेधातिथिः	विष्णुः	गायत्री
१६	इरावती धेनुमती हि भूतꣳ०	,, वसिष्ठः	,,	त्रिष्टुप्
१७	देवश्रुतौ देवेष्वाघोषतम् ।	,,	अक्षधुरौ	
	प्राची प्रेतमध्वरं०	,,	हविर्धाने	
	स्वं गोष्टमाददतं देवी०	,,	,,	
	अत्र रमेथां वर्ष्मन्पृथिव्याः ।	,,	,,	
१८	विष्णोर्नु कं वीर्याणि प्रवोचं०	,, दीर्घतमा औतथ्यः	विष्णुः	त्रिष्टुप्
१९	दिवो वा विष्णऽउत०	,,	,,	,,
२०	प्र तद्विष्णु·स्तवते वीर्येण०	,, दीर्घतमा औतथ्यः	,,	,,
२१	विष्णो रराटमसि०	,,	,,	
[उपरवमन्त्राः-मं. २२-२५]				
[अ.१मं.१०] २२	देवस्य त्वा सवितुः०	,,	[सविता]	
	आददे नार्यसि०	,,	अग्निः	
	इदमहꣳ रक्षसां ग्रीवा०	,,	रक्षोघ्नम्	
	बृहन्नसि बृहद्रवाः०	,,	उपरवाः	
२३	रक्षोहणं वलगहनं वैष्णवीं	,,	,,	
	इदमहं तं वलगमुत्किरामि०	,,	लिंगोक्ता	
२४	स्वराडसि सपत्नहा०	,,	उपरवाः	
२५	रक्षोहणो वो वलगहनः०	,,	विष्णुः	

उद्दिवं पञ्चानामौदुम्बरी, घृतेन द्यावापृथिव्यमिन्द्रस्यैन्द्रं,परि त्वा मधुच्छन्दा अनिरुक्ता-मैन्द्रीमनुष्टुभमिन्द्रस्यैन्द्राणि त्रीणि, चतुर्थं वैश्वदेवम्॥२०॥ [य० अ०५ मं० १४–३०]

विभूरस्यष्टानां धिष्ण्या अग्नयः, सम्राडाहवनीयः, परिपद्यो बहिष्पवमानदेशो, नभोऽसि चात्वालो, मृष्टोऽसि शामित्र, ऋतधामौदुम्बरी, समुद्रोऽसि ब्रह्मासनमजोऽसि शालाद्वार्योऽहिरसि प्राजहितो, वागसि सद, ऋतस्य द्वार्ये, अध्वनाꣳ सूर्यो, मित्रस्य-र्त्विजोऽग्नयो धिष्ण्याः ॥ २१ ॥ [य० अ० ५ मं० ३१–३४]

[अ.१मं.१०] २६	देवस्य त्वा सवितुः०	प्रजापतिः	सविता	
[अ.५ मं.२२]	आददे नार्यसि०	,,	अग्निः	
	यवोऽसि यवयास्मद्द्वेषो०	,,	यवः	
	दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वा।	,,	औदुम्बरः	
	शुन्धन्तां लोकाः पितृषदनाः०	,,	पितरः	
२७	उद्दिवꣳ स्तभानान्तरिक्षं पृण०	,,	औदुम्बरी	
२८	ध्रुवासि ध्रुवोऽयं यजमानो०	,,	,,	
	घृतेन द्यावापृथिवी पूर्येथाम्।	,,	द्यावापृथिवी	
	इन्द्रस्य छदिरसि विश्वजनस्य०	,,	इन्द्रः	
२९	परि त्वा गिर्वणो गिर०	,, मधुच्छन्दाः	,,	अनिरुक्ता अनुष्टुप्
३०	इन्द्रस्य स्यूरसीन्द्रस्य०	,,	,,	
	वैश्वदेवमसि।	,,	विश्वेदेवाः	
३१	विभूरसि प्रवाहणो०	,,	धिष्ण्या अग्नयः	
३२	उशिगसि कवि०	,,	,, ,,	
	सम्राडसि कृशानुः।	,,	आहवनीयः	
	परिषद्योऽसि पवमानः।	,,	बहिष्पवमानदेशः	
	नभोऽसि प्रतक्का।	,,	चात्वालः	
	मृष्टोऽसि हव्यसूदनः।	,,	शामित्रः	
	ऋतधामासि स्वर्ज्योतिः।	,,	औदुम्बरी	
३३	समुद्रोऽसि विश्वव्यचाः।	,,	ब्रह्मासनम्	
	अजोऽस्येकपात्।	,,	शालाद्वार्यः	
	अहिरसि बुध्न्यः।	,,	प्राजहितः	
	वागस्यैन्द्रमसि सदोऽसि।	,,	सदः	
	ऋतस्य द्वारौ मा मा सन्ताप्तम्।	,,	द्वार्ये	
	अध्वनामध्वपते प्र मा तिर०	,,	सूर्यः	
३४	मित्रस्य मा चक्षुषेध्वम्।	,,	ऋत्विजः	
	अग्नयः सगराः सगरा स्थ०	,,	धिष्ण्याः	

ज्योतिरसि वैश्वदेवं, त्वꣳ सोम क्रतुर्भार्गवः सौमीं गायत्रीमनवसानां, जुषाणो अप्तुदेवत्यैकपदा विराड् यजुरन्ताऽग्ने नयाऽगस्त्य आग्नेयीं त्रिष्टुभमयं नस्त्रिष्टुब्यजुरन्ताग्नेय्युरु विष्णो वैष्णव्यनुष्टुब्यजुरन्ता, देव सवितः सावित्रमेतत्त्वꣳ सौम्यꣳ, स्वाहा निर्लिङ्गोक्तदेवतमग्ने व्रतपा आग्नेयमत्यन्यान्वनस्पतिरोपधे कुशतरुणꣳ स्वधिते परशुर्द्यां माऽतस्त्वं वनस्पतिः ॥ २२ ॥ [य० अ० ५ मं० ३५--४३]

इति० संहितायां पञ्चमोऽध्यायः ॥ ५ ॥

अग्नेणीः शकलं, देवस्त्वा यूपः, सुपिप्पलाभ्यश्चषालं, द्यामग्रेण यूपो, या ते दीर्घतमा यूपदेवत्यां त्रिष्टुभं, ब्रह्मवनि ब्रह्म दꣳह यूपदेवत्ये, विष्णोः कर्माणि द्वे मेधातिथिर्वै-

३५	ज्योतिरसि विश्वरूपं०	प्रजापतिः	विश्वेदेवाः	
	त्वꣳसोम तनूकृद्भ्यो०	,, क्रतुर्भार्गवः	सोमः	अनवसाना गायत्री
	जुषाणोऽअप्तुराज्यस्य वेतु स्वाहा।	,,	अप्तुः	एकपदा विराट्
३६	अग्ने नय सुपथा रायेऽअस्मान्०	,, अगस्त्यः	अग्निः	त्रिष्टुप्
३७	अयं नो अग्निर्वरिवस्कृणो०	,,	,,	यजुरन्ता ,,
३८	उरु विष्णो विक्रमस्वोरु०	,,	विष्णुः	,, अनुष्टुप्
३९	देव सवितरेष ते सोम०	,,	सविता	
	एतत्त्वं देव सोम०	,,	सोमः	
	स्वाहा निर्वरुणस्य पाशान्मुच्ये।	,,	लिङ्गोक्ता	
४०	अग्ने व्रतपास्त्वे व्रतपा०	,,	अग्निः	
[अ.५ मं.३८] ४१	उरु विष्णो विक्रमस्वोरु०	,,	[विष्णुः]	
४२	अत्यन्याँ२ऽअगां०	,,	वनस्पतिः	
	ओषधे त्रायस्व।	,,	कुशतरुणम्	
	स्वधिते मैनꣳ हिंसीः।	,,	परशुः	
४३	द्यां मा लेखीरन्तरिक्षं मा०	,,	वनस्पतिः	
	अतस्त्वं देव वनस्पते०	,,	,,	

अथ० संहितायां षष्ठोऽध्यायः।

[अ.५ मं.२६] १	देवस्य त्वा सवितुः०	प्रजापतिः।	[सविता]	
२	अग्नेणीरसि स्वावेश०	,,	शकलम्	
	देवस्त्वा सविता मध्वानक्तु।	,,	यूपः	
	सुपिप्पलाभ्यस्त्वौषधीभ्यः।	,,	चषालम्	
	द्यामग्रेणास्पृक्ष आन्तरिक्षं०	,,	यूपः	
३	या ते धामान्युश्मसि०	,, दीर्घतमाः	,,	त्रिष्टुप्
	ब्रह्मवनि त्वा० ब्रह्म दꣳह०	,,	,,	
४	विष्णोः कर्माणि पश्यत०	,, मेधातिथिः	विष्णुः	गायत्री
५	तद्विष्णोः परमं पदं०	,, ,,	,,	,,

ष्णव्यौ गायत्र्यौ, परिवीर्यूपो, दिवः स्वरुरेप ते यूप, उपावीस्तृणमुप देवां लिङ्गोक्तमृतस्य त्वा पशुरग्नीषोमाभ्यां लिङ्गोक्तमद्भ्योऽपां पशुरापो देवीरापश्छं, सं ते पशुर्घृतेन स्वरुशासौ, रेवति वाग्, वर्षो तृणश्छं, स्वाहा दैवे॥ २३ ॥ [य० अ०६ मं० १--११]

माहिर्भूं रज्जुर्नमस्ते यज्ञो, देवीरापोऽद्भ्यमापमद्भ्यमाशीर्वाचं ते मनस्ते पशुः, शं लिङ्गोक्तमोषधे तृणश्छं, स्वधितेऽसी रक्षसां लिङ्गोक्तं, निरस्तमिदमहश्छं रक्षोहणी, घृतेन द्यावा-

	६ परिवीरसि परि त्वा०	प्रजापतिः	यूपः
	दिवः सूनुरसि ।	,,	स्वरुः
	एष ते पृथिव्याँल्लोक०	,,	यूपः
	७ उपावीरसि ।	,,	तृणम्
	उप देवान्दैवीर्विशः०	,,	लिङ्गोक्ता
	८ रेवती रमध्वं बृहस्पते०	,,	,,
	ऋतस्य त्वा देवहविः०	,,	पशुः
[अ.१।मं.१०]	९ देवस्य त्वा सवितुः०	,,	[सविता]
	अग्नीषोमाभ्यां त्वा०	,,	लिङ्गोक्ता (अग्नीषोमौ)
	अद्भ्यस्त्वौषधीभ्योऽनु त्वा०	,,	पशुः
	१० अपां पेरुरसि ।	,,	,,
	आपो देवीः स्वदन्तु०	,,	आपः
	सं ते प्राणो वातेन गच्छता०	,,	पशुः
	११ घृतेनाक्तौ पशूꣳस्त्रायेथाम् ।	,,	स्वरुशासौ
	रेवति यजमाने प्रियं धा०	,,	वाक्
	वर्षो वर्षीयसि यज्ञे यज्ञपतिं धाः ।	,,	तृणं
	स्वाहा देवेभ्यो देवेभ्यः स्वाहा ।	,,	देवाः
	१२ माहिर्भूर्मा पृदाकुः ।	,,	रज्जुः
	नमस्त आतानानर्वा प्रेहि०	,,	यज्ञः
	१३ देवीरापः शुद्धा वोद्वꣳ०	,,	आपः
	सुपरिविष्टा वयं परिवेष्टारो०	,,	आशीः
	१४ वाचं ते शुन्धामि०	,,	पशुः
	१५ मनस्त आप्यायतां०	,,	,,
	शमहोभ्यः ।	,,	लिङ्गोक्ता (सुखं)
	ओषधे त्रायस्व ।	,,	तृणम्
	स्वधिते मैनꣳ हिꣳसीः ।	,,	असिः
	१६ रक्षसां भागोऽसि ।	,,	लिङ्गोक्ता (रक्षः)
	निरस्तꣳ रक्षः	,,	(रक्षः)
	इदमहꣳ रक्षोऽभितिष्ठामि०	,,	,,

पृथिव्यं, वायो वायव्यमग्निराज्यस्याग्नेयꣳ, स्वाहाकृते वपाश्रपण्याविदमाप आपी महापंक्तिस्त्र्यवसाना, पावमानश्चान्त्यः पादः, सं ते हृदयꣳ, रेडसि वसा, प्रयुतं लिङ्गोक्तं, घृतं वैश्वदेवं, दिशः पञ्च दिश्यान्यैन्द्रः प्राणः पश्चङ्गप्राणदानं लिङ्गोक्तं, देवस्त्वाष्ट्री त्रिष्टुप् ॥ २४ ॥ [य० अ०६ मं० १२--२०]

समुद्रं लिङ्गोक्तानि द्वादश, दिवं ते स्वरुर्मापो हृदयशूलं, धाम्नोधाम्नो वारुणं, यदाहुर्वारुणी गायत्र्यनवसाना, सुमित्रिया न आपꣳ, हविष्मतीर्लिङ्गोक्तदेवताऽनुष्टुवग्नेर्वश्त्वार्यापान्यमूरापीं गायत्रीं मेधातिथिर्हृदे सौम्यनुष्टुप्, सोम राजन्त्सौम्ये, शृणोतु लिङ्गोक्तदेवता त्रिष्टुब्, देवीराप आपी पंक्तिः, कार्षिराज्यमनुष्टुप्, समुद्रस्य समाप

	घृतेन द्यावापृथिवी०	प्रजापतिः	द्यावापृथिवी	
	वायो वेस्तोकानाम् ।	,,	वायुः	
	अग्निराज्यस्य वेतु स्वाहा ।	,,	अग्निः	
	स्वाहाकृते उर्ध्वनभसं०	,,	वपाश्रपण्यौ	
१७	इदमापः प्र वहतावद्यं०	,,	आपः	महापंक्तिस्त्र्यवसाना
	आपो मा तस्मादेनसः०	,,	पवमानः	,, ,,
१८	सं ते मनो मनसा०	,,	हृदयम्	
	रेडस्यग्निष्ट्वा श्रीणा०	,,	वसा	
	प्रयुतं द्वेषः ।	,,	लिङ्गोक्ता (द्वेषः)	
१९	घृतं घृतपावानः पिबत०	,,	विश्वेदेवाः	
	दिशः प्रदिश आदिश०	,,	दिशः	
२०	ऐन्द्रः प्राणोऽअङ्गेऽअङ्गे०	,,	लिङ्गोक्ता (प्राणः)	
	देव त्वष्टर्भूरि ते०	,,	त्वष्टा	त्रिष्टुप्
२१	समुद्रं गच्छ स्वाहा०	,,	लिंगोक्ताः (समुद्रादीनि)	
	दिवं ते धूमो गच्छतु०	,,	स्वरुः	
२२	मापो मौषधीर्हिꣳसीः ।	,,	हृदयशूलम्	
	धाम्नो धाम्नो राजँस्ततो वरुण०	,,	वरुणः	
	यदाहुरघ्न्या इति वरुणेति०	,,	,,	गायत्री अनवसाना
	सुमित्रिया न आप ओषधयः सन्तु०	,,	आपः	
२३	हविष्मतीरिमाऽआपो०	,,	लिङ्गोक्ताः (अबादयः)	अनुष्टुप्
२४	अग्नेर्वोऽपन्नगृहस्य०	,,	आपः	
	अमूर्याऽउप सूर्य०	,, मेधातिथिः	,,	गायत्री
२५	हृदे त्वा मनसे त्वा०	,,	सोमः	अनुष्टुप्
२६	सोम राजन्विश्वास्त्वं प्रजा०	,,	,,	
	शृणोत्वग्निः समिधा हवं मे	,,	लिङ्गोक्ताः (अग्न्यादयः)	त्रिष्टुप्

आपे, यमग्ने मधुच्छन्दा आग्नेयीं गायत्रीमाददे ग्रावा, निग्राभ्या आपमिन्द्राय त्वा पञ्च सौम्यानि, यत्ते सौमी विपरीता बृहती, श्वात्राः पथ्या बृहती, मा भेः सौम्यमर्द्धं द्यावापृथिव्यमर्द्धं, प्रागपाक्सौम्युष्णिक्, त्वमङ्ग गोतम ऐन्द्रीं पथ्याबृहतीम् ॥ २५ ॥ [य० अ०६ मं० २१–३७]

इति० संहितायां षष्ठोऽध्यायः ॥ ६ ॥

वाचस्पतये प्राणदेवत्या विराण्, मधुमतीर्लिङ्गोक्तं, यत्ते सौम्यꣳ, स्वाहोरु यजुषी लिङ्गोक्ते, स्वाङ्कृतोऽस्युपाꣳशुर्देवेभ्यस्त्वा दैवं, देवाꣳशो लिङ्गोक्तमाभिचारिकं, प्राणाय ग्रहो, व्यानायोपाꣳशुसवन, उपयामगृहीतोऽस्यन्तरैन्द्रमन्तस्ते मघवदेवत्या त्रिष्टुबुदानाय

२७	देवीरापोऽअपां नपाद्यो व०	प्रजापतिः	आपः	पंक्तिः
२८	कार्षिरसि ।	,,	आज्यम्	अनुष्टुप्
	समुद्रस्य त्वाक्षित्या उन्नयामि ।	,,	आपः	,,
	समापोऽअद्भिरग्मत०	,,	,,	,,
२९	यमग्ने पृत्सु मर्त्यमवा०	,, मधुच्छन्दाः	अग्निः	गायत्री
[अ. १। १०] ३०	देवस्य त्वा सवितुः०	,,	[सविता]	
	आददे रावासि०	,,	ग्रावा	
	निग्राभ्या स्थ देवश्रुत०	,,	आपः	
३१	मनो मे तर्पयत०	,,		
३२	इन्द्राय त्वा वसुमते०	,,	सोमः	
३३	यत्ते सोम दिवि ज्योति०	,,	,,	विपरीता बृहती
३४	श्वात्रा स्थ वृत्रतुरो०	,,	(निग्राभ्याः)	पथ्या बृहती
३५	मा भेर्मा संविक्था ऊर्जं धत्स्व ।	,,	सोमः	
	धिषणे वीड्वी सती वीडयेथा०	,,	द्यावापृथिवी	
३६	प्रागपागुदगधरा०	,,	सोमः	उष्णिक्
३७	त्वमङ्ग प्रशꣳसिषो०	,, गोतमः	इन्द्रः	पथ्या बृहती

अथ० संहितायां सप्तमोऽध्यायः ।

१	वाचस्पतये पवस्व०	प्रजापतिः	प्राणः	विराट्
२	मधुमतीर्न इषस्कृधि ।	,,	लिङ्गोक्ता	
	यत्ते सोमादाभ्यं नाम०	,,	सोमः (अग्निः, रक्षः)	
	स्वाहा । उर्वन्तरिक्षमन्वेमि ।	,,	लिङ्गोक्ता	
३	स्वांकृतोऽसि विश्वेभ्यऽइन्द्रियेभ्यो०	,,	उपांशुः (ग्रहः)	
	देवेभ्यस्त्वा मरीचिपेभ्यः ।	,,	देवाः	
	देवाꣳशो यस्मै त्वेडे०	,,	लिङ्गोक्तं (सोमांशुः)	
	प्राणाय त्वा ।	,,	ग्रहः	
	व्यानाय त्वा ।	,,	उपांशुसवनः	

ग्रह, आ वायो वसिष्ठो वायव्यां त्रिष्टुभमिन्द्रवायू मधुच्छन्दा ऐन्द्रवायवीं गायत्रीमयं वां गृत्समदो मैत्रावरुणीꣳ, राया वयं त्रसदस्युस्त्रिष्टुभं, या वां मेधातिथिराश्विनीं गायत्रीं, तं प्रत्नथाऽवत्सारः काश्यपो वैश्वदेवीं जगतीमच्छिन्नस्य सौम्यꣳ, सा प्रथमैन्द्री त्रिष्टुप्, तृम्पन्त्वयाडग्नील्लिङ्गोक्ते ॥ २६ ॥ [य० अ० ७ मं० १-१५]

अयं वेनो वेनस्य त्रिष्टुप् सोमस्तुतिरधिदैवतमधियज्ञं च, मनो न त्रिष्टुप्सोमस्तुतिरधियज्ञानुवादिन्यपमृष्टः शण्डोऽपमृष्टो मर्क आभिचारिके, देवास्त्वा शुक्रामन्थिनावनाधृष्टासि दक्षिणोत्तरवेदिश्रोण्यौ, सुवीरः सुप्रजाः शुक्रामन्थिनौ, निरस्तो द्वे आभि-

	४	उपयामगृहीतोऽस्यन्तर्यच्छ०	प्रजापतिः	इन्द्रः	
	५	अन्तस्ते द्यावापृथिवी०	,,	मघवा	त्रिष्टुप्
[अ. ७ मं. ३]	६	स्वांकृतोऽसि विश्वेभ्य०	,,	[उपांशुः (ग्रहः)]	
,,		देवेभ्यस्त्वा मरीचिपेभ्यः	,,	[देवाः]	
		उदानाय त्वा ।	,,	ग्रहः	
	७	आ वायो भूष शुचिपा०	,, वसिष्ठः	वायुः	त्रिष्टुप्
	८	इन्द्रवायूऽइमे सुता०	,, मधुच्छन्दाः	इन्द्रवायू	गायत्री
	९	अयं वां मित्रावरुणा०	,, गृत्समदः	मित्रावरुणौ	,,
	१०	राया वयꣳ ससवाꣳसो मदेम०	,, त्रसदस्युः	,,	त्रिष्टुप्
	११	या वां कशा मधुमत्यश्विना०	,, मेधातिथिः	अश्विनौ	गायत्री
	१२	तं प्रत्नथा पूर्वथा विश्वथेमथा०	,, अवत्सारःकाश्यपः	विश्वेदेवाः	जगती
	१३	सुवीरो वीरान्प्रजनयन्०	,,	शुक्रम्	
		निरस्तः शण्डः०	,,	आभिचारिकम्	
		शुक्रस्याधिष्ठानमसि ।	,,	शकलम्	
	१४	अच्छिन्नस्य ते देव सोम०	,,	सोमः	
		सा प्रथमा संस्कृति०	,,	इन्द्रः	त्रिष्टुप्
	१५	स प्रथमो बृहस्पति०	,,	,,	,,
		तृम्पन्तु होत्रा मध्वा०	,,	लिङ्गोक्ता	,,
		अयाडग्नीत् ।	,,	,,	
	१६	अयं वेनश्चोदयत्पृश्निगर्भा०	,,	वेनः (सोमः)	त्रिष्टुप्
	१७	मनो न येषु हवनेषु०	,,	,,	,,
		अपमृष्टो मर्कः ।	,,	आभिचारिकं	
		देवास्त्वा मन्थिपाः०	,,	शुक्रामन्थिनौ	
		अनाधृष्टासि ।	,,	दक्षिणोत्तरवेदिश्रोण्यौ	
	१८	सुप्रजाः प्रजाः प्रजनयन्०	,,	मन्थी	
		निरस्तो मर्कः ।	,,	आभिचारिकम्	

चारिके, शुक्रस्य मन्थिनः शकलं, ये देवासः परुच्छेपो वैश्वदेवीं त्रिष्टुभमाग्रयणोऽसि लिङ्गोक्तदेवतम् ॥ २७ ॥ [य० अ० ७ मं० १६–२०]

सोमः पवते वैश्वदेवमिन्द्राय त्वा पञ्च लिङ्गोक्तानि, मूर्द्धानं भरद्वाजो वैश्वानरीं त्रिष्टुभं, ध्रुवोऽसि ध्रुवो, ध्रुवं ध्रुवेण बृहती पूर्वोऽर्द्धर्चो ध्रौव उत्तर ऐन्द्रो, यस्ते देवश्रवाः सौमीं त्रिष्टुभं यजुरन्तां, देवानां चात्वालदेवतं, प्राणाय मे लिङ्गोक्तदेवतान्येकादश, कोऽसि प्राजापत्योष्णिग्वर्धमाना, मधवे त्वा लिङ्गोक्तदेवतानि त्रयोदश ॥२८॥ [य० अ० ७ मं० २१–३०]

इन्द्राग्नी विश्वामित्र ऐन्द्राग्नीं गायत्रीमा घ त्रिशोक आग्नेन्द्रीमोमासो मधुच्छन्दा वैश्वदेवीं, विश्वे देवासो गृत्समद, इन्द्र मरुत्वश्चतस्रो विश्वामित्र ऐन्द्रामारुतीस्त्रिष्टुभो,

	मन्थिनोऽधिष्ठानमसि ।	प्रजापतिः ।	शकलम्	
१९	ये देवासो दिव्येकादश स्थ०	,, परुच्छेपः	विश्वेदेवाः	त्रिष्टुप्
२०	उपयामगृहीतोऽस्याग्रयणोऽसि०	,,	लिङ्गोक्ता (आग्रयणः)	
२१	सोमः पवते सोमः पवतेऽस्मै०	,,	विश्वेदेवाः	
२२	उपयामगृहीतोऽसीन्द्राय त्वा०	,,	लिंगोक्ता (ग्रहः)	
२३	मित्रावरुणाभ्यां त्वा देवाव्यं०	,,	,, ,,	
२४	मूर्धानं दिवोऽअरतिं पृथिव्या०	,, भरद्वाजः	वैश्वानरः	त्रिष्टुप्
२५	उपयामगृहीतोऽसि ध्रुवोऽसि०	,,	ध्रुवः	
	ध्रुवं ध्रुवेण मनसा०	,,	,,	बृहती
	अथा नऽइन्द्र इद्दिशो०	,,	इन्द्रः	,,
२६	यस्ते द्रप्सः स्कन्दति०	,, देवश्रवाः	सोमः (यजुरन्ता)	त्रिष्टुप्
	देवानामुत्क्रमणमसि ।	,,	चात्वालः	
२७	प्राणाय मे वर्चोदा वर्चसे०	,,	लिंगोक्ता(उपांशुसवनादयः)	
२८	आत्मनो मे वर्चोदा०	,,	,, (आग्रयणादयः)	
२९	कोऽसि कतमोऽसि०	,,	प्रजापतिः	उष्णिक्
३०	उपयामगृहीतोऽसि मधवे त्वा०	,,	लिंगोक्ता (ग्रहाः)	
३१	इन्द्राग्नीऽआगतꣳ सुतं०	,, विश्वामित्रः	इन्द्राग्नी	गायत्री
३२	आ घा येऽअग्निमिन्धते०	,, त्रिशोकः	अग्नीन्द्रौ	,,
३३	ओमासश्चर्षणीधृतो०	,, मधुच्छन्दाः	विश्वेदेवाः	,,
३४	विश्वे देवास आगत०	,, गृत्समदः	,,	,,
३५	इन्द्र मरुत्व इह पाहि सोमं०	,, विश्वामित्रः	इन्द्रामरुतौ	त्रिष्टुप्
३६	मरुत्वन्तं वृषभं वावृधानं०	,, ,,	,,	,,
	उपयामगृहीतोऽसि मरुतां त्वौजसे ।	,,	मरुत्वान्	
३७	सजोषा इन्द्र सगणो मरुद्भिः ।	,, ,,	इन्द्रामरुतौ	,,

मरुतां त्वा यजुर्मरुत्वतीयं, महाँ२ऽइन्द्रो भरद्वाजो माहेन्द्रीं त्रिष्टुभं, य ओजसा वत्सो गायत्रीमुदु त्यं प्रस्कण्वः सौरीं गायत्रीं, चित्रं कुत्स आङ्गिरसस्त्रिष्टुभञ्छ, रूपेण वो दक्षिणाश्चतुर्णां, ब्राह्मणमद्य लिङ्गोक्तदेवतान्यष्टौ ॥ २९ ॥ [य०अ०७ मं०३१-४८]

इति० संहितायां सप्तमोऽध्यायः ॥ ७ ॥

विष्णो वैष्णवं, कदाचनादित्यदेवत्ये बृहत्यौ, यज्ञो देवानां कुत्सस्त्रिष्टुभं, विवस्वन्यजुः, श्रदसै जगत्याशीर्वामद्य भरद्वाजो बार्हस्पत्यः सावित्रीं त्रिष्टुभञ्छ, सावित्रोऽसि सावित्रञ्छ, सुशर्मासि वैश्वदेवं, बृहस्पतिसुतस्य लिङ्गोक्तमहं प्रजापतिरूपेणात्मा देवता

	३८	मरुत्वाँ२ऽइन्द्र वृषभो०	प्रजापतिः । विश्वामित्रः	इन्द्रामरुतौ	त्रिष्टुप्
	३९	महाँ२ऽ इन्द्रो नृवदा०	,, भरद्वाजः	महेन्द्रः	,,
	४०	महाँ२ऽ इन्द्रो यऽओजसा०	,, वत्सः	,,	गायत्री
	४१	उदु त्यं जातवेदसं०	,, प्रस्कण्वः	सूर्यः	,,
	४२	चित्रं देवानामुदगादनीकं०	,, कुत्स आंगिरसः	,,	त्रिष्टुप्
[अ.५।३६]	४३	अग्ने नय सुपथा राये०	,, अगस्त्यः	[अग्निः]	,,
[अ.५।३७]	४४	अयं नो अग्निर्वरिव०	,,	,,	,,
	४५	रूपेण वो रूपमभ्यागां०	,,	दक्षिणा	
	४६	ब्राह्मणमद्य विदेयं०	,,	लिंगोक्ता (ब्राह्मणः)	
	४७	अग्नये त्वा मह्यं०	,,	,,	
		रुद्राय त्वा मह्यं०	,,	,,	
		यमाय त्वा मह्यं०	,,	,,	
	४८	कोऽदात्कस्मा अदात्०	,,	,, (कामः)	

अथ० संहितायामष्टमोऽध्यायः ।

	१	उपयाम०ऽस्यादित्येभ्यस्त्वा०	प्रजापतिः	(सोमः)	
		विष्णऽउरुगायैष०	,,	विष्णुः	
	२	कदाचन स्तरीरसि०	,,	आदित्यः	बृहती
	३	कदाचन प्रयच्छस्युभे०	,,	,,	,,
	४	यज्ञो देवानां प्रत्येति०	,, कुत्सः	,,	त्रिष्टुप्
	५	विवस्वन्नादित्यैष ते०	,,	,,	
		श्रदस्मै नरो वचसे दधातन०	,,	आशीः (नरः वा)	जगती
	६	वाममद्य सवितर्वाममु श्वो०	,, भरद्वाजोबार्हस्पत्यः	सविता	त्रिष्टुप्
	७	उपयाम० सावित्रोऽसि०	,,	सविता	
	८	,, सुशर्मासि०	,,	विश्वेदेवाः	
	९	,, बृहस्पतिसुतस्य०	,,	लिंगोक्ता (सोमः)	
		अहं परस्तादहमवस्तात्०	,,	आत्मा प्रजापतिरूपेण	त्रिष्टुप्

त्रिष्टुबग्नाऽ३इ पत्नीवन्नाग्नेयं, प्रजापतिः प्राजापत्यꣳ, हरिरस्यृक्सामे, हर्योर्यस्ते लिङ्गोक्ते, देवकृतस्याग्नेयानि षट् ॥ ३० ॥ [य० अ० ८ मं० १–१३]

समिन्द्राऽत्रिर्वैश्वदेवीं त्रिष्टुभं, धाता लिङ्गोक्तबहुदेवत्या, सुगा वो दैवी, याँ२ऽ आवहो वयमाग्नेय्यौ, यज्ञ यज्ञमेप ते लिङ्गोक्ते यजुषी, उरुꣳ हि शुनःशेपो वारुणीं त्रिष्टुभं, नमो वारुणमग्नेरनीकमाग्नेयी त्रिष्टुप्, समुद्रे ते सौमी विराड्, देवीरापः पंक्तिर्बृहती वा पूर्वोऽर्द्धर्च आप उत्तरः सौम्यो, देवानामाग्नेयमेजतु व्यवसाना महापंक्तिर्यस्यैते वशा,

	१०	अग्ना३ऽइ पत्नीवन्०	प्रजापतिः	अग्निः	
		प्रजापतिर्वृषासि०	,,	प्रजापतिः	
	११	उपयाम० हरिरसि०	,,	ऋक्सामे	
		हर्योर्धानाः स्थ०	,,	लिंगोक्ता (धानाः)	
	१२	यस्तेऽअश्वसनिर्भक्षो०	,,	,, (भक्षणीयं द्रव्यम्)	
	१३	देवकृतस्यैनसोऽवयजन०	,,	अग्निः	
[अ.२।२४]	१४	सं वर्चसा पयसा०	,,	त्वष्टा	त्रिष्टुप्
	१५	समिन्द्र णो मनसा०	,, अग्निः	विश्वेदेवाः	त्रिष्टुप्
[अ.२।२४]	१६	सं वर्चसा पयसा०	,,	त्वष्टा	,,
	१७	धाता रातिः सवितेदं जुषन्ता०	,,	लिङ्गोक्ताः (धात्रादयः)	त्रिष्टुप्
	१८	सुगा वो देवाः सदना अकर्म०	,,	देवाः	,,
	१९	याँ२ऽआवह उशतो०	,,	अग्निः	,,
	२०	वयꣳ हि त्वा प्रयति यज्ञे०	,,	,,	,,
[अ. २।२१]	२१	देवा गातुविदो गातुं वित्वा	,, मनसस्पतिः	वातः	विराट्
	२२	यज्ञ यज्ञं गच्छ०	,,	लिङ्गोक्ता (यज्ञः)	
		एष ते यज्ञो यज्ञपते०	,,	,, (यज्ञपतिः)	
[अ. ६।१२]	२३	माहिभूर्मा पृदाकुः	,,	रज्जुः	
		उरुꣳ हि राजा वरुणश्चकार०	,, शुनःशेपः	वरुणः	त्रिष्टुप्
		नमो वरुणायाभिष्टितो०	,,	,,	
	२४	अग्नेरनीकमपऽआविवेशापां०	,,	अग्निः	,,
	२५	समुद्रे ते हृदयमप्स्वन्तः०	,,	सोमः	विराट्
	२६	देवीराप ऽएष वो गर्भ०	,,	आपः	पंक्तिः बृहती वा
		देव सोमैष ते लोक०	,,	सोमः	,, ,,
[अ. ३।४८]	२७	अवभृथ निचुम्पुण०	,,	यज्ञः	
		देवानाꣳ समिदसि ।	,,	अग्निः	
	२८	एजतु दशमास्यो गर्भो०	,,	(गर्भः)	व्यवसाना महापंक्तिः
	२९	यस्यैते यज्ञियो गर्भो०	,,	वशा	(अनुष्टुप्)

पुरुदस्मो गर्भो, मरुतो यस्य गोतमो मारुतीं गायत्रीं, मही द्यौर्मेधातिथिर्द्यावापृथिव्या-मित्यग्निष्टोमः ॥ ३१ ॥ [य० अ० ८ मं० १४-३२]

अथ षोडशी- आतिष्ठ गोतम ऐन्द्रीमनुष्टुभं, युक्ष्वा हि मधुच्छन्दा, इन्द्रमिद्गोतमो, यस्मान्नैन्द्री त्रिष्टुप् परब्रह्मरूपेण षोडशिन स्तुतिरिन्द्रश्चैन्द्रावारुणी षोडशिदेवत्या वा यजुरन्ताग्ने पवस्व वैखानस आग्नेयीं गायत्रीमुत्तिष्ठन् कुरुस्तुतिरैन्द्रीमदश्रं प्रस्कण्वः सौरीं, तिस्रोऽपि यजुरन्ता, उदु त्यं देवानामार्षमाजिघ्रेडे कौसुरुविन्दुर्गव्ये महापंक्तिप्रस्तार-पंक्ती, वि नः शासो भारद्वाज ऐन्द्रीमनुष्टुभं, वाचस्पतिं वैश्वकर्मणीं त्रिष्टुभं, विश्वकर्म-न्नैन्द्रीं वैश्वकर्मणीमग्नये त्वा देवार्षण्यदाभ्यदेवत्यानि, त्रेशीनां त्वा सौम्यानि ॥ ३२ ॥ [य० अ० ८ मं० ३३-५०]

३०	पुरुदस्मो विपुरूप०	प्रजापतिः	गर्भः	
३१	मरुतो यस्य हि क्षये०	,, गोतमः	मरुतः	गायत्री
३२	मही द्यौः पृथिवी च न०	,, मेधातिथिः	द्यावापृथिवी	,,
[इत्यग्निष्टोमः ।]				
(अथ षोडशी । अ० ८ । ३३—५०)				
३३	आतिष्ठ वृत्रहन् रथं०	गोतमः	इन्द्रः	अनुष्टुप्
३४	युक्ष्वा हि केशिना हरी०	मधुच्छन्दाः	,,	,,
३५	इन्द्रमिद्धरी वहतो०	गोतमः	,,	,,
३६	यस्मान्न जातः परो०	(विवस्वान्)	,, (परब्रह्मरूपेण षोडशिनः स्तुतिः)	
३७	इन्द्रश्च सम्राड् वरुणश्च०	,,	इन्द्रावरुणौ षोडशी वा ।	त्रिष्टुब्यजुरन्ता
३८	अग्ने पवस्व स्वपा०	वैखानसः	अग्निः	(यजुरन्ता) गायत्री
३९	उत्तिष्ठन्नोजसा सह०	कुरुस्तुतिः	इन्द्रः ,,	,,
४०	अदश्रमस्य केतवो०	प्रस्कण्वः	सूर्यः ,,	,,
४१	उदु त्यं जातवेदसं०	देवाः	,,	,,
४२	आजिघ्र कलशं मह्य०	कुसुरुबिन्दुः	गौः	महापंक्तिः
४३	इडे रन्ते हव्ये काम्ये०	,,	,,	प्रस्तारपंक्तिः
४४	वि न इन्द्र मृधो जहि०	शासो भारद्वाजः	इन्द्रः	अनुष्टुप्
४५	वाचस्पतिं विश्वकर्माण०	,, ,,	विश्वकर्मा	त्रिष्टुप्
४६	विश्वकर्मन्हविषा वर्धनेन०	,, ,,	,, ,,	,,
४७	उपयाम० अग्नये त्वा०	देवाः	अदाभ्यं	
४८	त्रेशीनां त्वा पत्मन्नाधू०	,,	सोमः	
४९	ककुभꣳ रूपं वृषभस्य०	,,	,,	
५०	उशिक्त्वं देव सोमाग्नेः०	,,	,,	

सत्रोस्थानं– देवानामार्षमिह रतिः पशुदैवतमुपसृजन्नुष्णिगाग्नेयी, सत्रस्य बृहती यजमानानामात्मस्तुतिर्युवं तं पुरुच्छेप ऐन्द्रीमत्यष्टिं व्यवसानामाद्योऽर्द्धर्च ऐन्द्रापार्वतः, परमेष्ठी नैमित्तिकान्याध्यायाद्वसिष्ठस्यार्षं लिङ्गोक्तदेवतानि चतुस्त्रिंशद्यर्योर्वैष्णववारुणी त्रिष्टुब्, देवान्दिवमाशीर्लिङ्गोक्तदेवता, चतुस्त्रिंशद्धर्मदेवत्या पंक्तिस्त्रिष्टुब् वा, यज्ञस्य यज्ञदेवत्या त्रिष्टुबापवस्व सौमीं गायत्रीं नैध्रुविः कश्यपः ॥३३॥ [य०अ०८मं०५१–६३]

इति० संहितायामष्टमोऽध्यायः ॥ ८ ॥

अथ वाजपेयो– बृहस्पतेरार्षमिन्द्रस्य च, देव सवितः सावित्री त्रिष्टुब्, ध्रुवसदमैन्द्राणि त्रीण्यपाꣳ रसदेवत्यानुष्टुब्, ग्रहा लिङ्गोक्तदेवतानुष्टुप्, सम्पृचौ यजुषी, इन्द्रस्य

[सत्रोस्थानं । अ. ८ मं. ५१–५३]

५१	इह रतिरिह रमध्वं०	देवाः	पशुः	
	उपसृजन्धरुणं मात्रे०	,,	अग्निः	उष्णिक्
५२	सत्रस्य ऋद्धिरस्यगन्म०	,,	यजमानानामात्मस्तुतिः	बृहती
५३	युवं तमिन्द्रापर्वता०	,, परुच्छेपः	इन्द्रापर्वतौ व्यवसाना	अत्यष्टिः
	दूरे चत्ताय०	,, ,,	इन्द्रः ,,	,,

[नैमित्तिकानि । अ. ८ मं ५४–६३]

५४	परमेष्ठ्यभिधीतः०	वसिष्ठः	लिंगोक्ता (प्रजापत्यादयः)	
५५	इन्द्रश्च मरुतश्च०	,,	,, (इन्द्रादयः)	
५६	प्रोह्यमाणः सोम०	,,	,, (वरुणादयः)	
५७	विश्वेदेवा अशृण्वु०	,,	,, (विश्वेदेवादयः)	
५८	विश्वेदेवाश्चमसेषू०	,,	,, ,,	
५९	सन्नः सिन्धुरवभृथा०	,,	,, (सिंध्वादयः)	
	ययोरोजसा स्कभिता रजाꣳसि०	,,	विष्णुवरुणौ	त्रिष्टुप्
६०	देवान्दिवमगन्यज्ञः०	,,	आशीः लिंगोक्ता (यज्ञः)	
६१	चतुस्त्रिꣳशत्तन्तवो ये०	,,	धर्मः	पंक्तिः त्रिष्टुप् वा
६२	यज्ञस्य दोहो विततः०	,,	यज्ञः	त्रिष्टुप्
६३	आपवस्व हिरण्यवदश्ववत्०	,, नैध्रुविःकश्यपः ।	सोमः	गायत्री

अथ० संहितायां नवमोऽध्यायः ।

[अथ वाजपेयः । अ. ९ मं. १—३४]

१	देव सवितः प्रसुव०	बृहस्पतिः,	इन्द्रः	सविता	त्रिष्टुप्
२	ध्रुवसदं त्वा नृषदं०	,,	,,	इन्द्रः	
	अप्सुषदं त्वा घृतसदं०	,,	,,	,,	
	पृथिवीसदं त्वाऽन्तरिक्षसदं०	,,	,,	,,	
३	अपाꣳ रसमुद्वयसं०	,,	,,	रसः	अनुष्टुप्
४	ग्रहाऽऊर्जाहुतयो०	,,	,,	लिङ्गोक्ता (ग्रहाः)	,,

रथो, वाजस्य पार्थिव्यतिजगत्यन्त्यः पादः सावित्रोऽप्स्वन्तरश्वदेवत्याऽनवसाना पुर उष्णिग्, वातो वा तिस्रोऽश्वस्तुतय उष्णिक्त्रिष्टुब्जगत्यो, वाजिनोऽश्वा, देवस्याहं लिङ्गोक्तानि, वाजिनोऽश्वा, एष स्य द्वे दधिक्रावा वामदेव्योऽश्वदेवत्ये जगत्यौ, शं नो वसिष्ठो विराजं, ते नो नाभानेदिष्ठो जगतीं, वाजेवाजे वसिष्ठस्त्रिष्टुभमा मा प्राजापत्यां, वाजिनोऽश्वाः ॥ ३४ ॥ [य० अ० ९ मं० १--१९]

आपय आयुर्यज्ञेन प्राजापत्यानि, प्रजापतेः स्वरमृता यजमानोऽस्मे दिशो, नमः

	संपृचौ स्थः सं मा भद्रेण पृंक्तम्। बृहस्पतिः	इन्द्रः	लिङ्गोक्ता (सोमग्रहः)		
	विपृचौ स्थो वि मा पाप्मना पृंक्तम्। ,,	,,	,, (सुराग्रहः)		
५	इन्द्रस्य वज्रोऽसि० ,,	,,	रथः		
	वाजस्य नु प्रसवे मातरं मही० ,,	,,	पृथिवी		अतिजगती
	तस्यां नो देवः सविता धर्म० ,,	,,	सविता		,,
६	अप्स्वन्तरमृतमप्सु० ,,	,,	अश्वः	अनवसाना पुर	उष्णिक्
७	वातो वा मनो वा गन्धर्वाः० ,,	,,	,, (अश्वस्तुतिः)		उष्णिक्
८	वातरंहा भव वाजिन्० ,,	,,	,, ,,		त्रिष्टुप्
९	जवो यस्ते वाजिन्० ,,	,,	,, ,,		जगती
	वाजिनो वाजजितो वाजꣳ० ,,	,,	अश्वाः		
१०	देवस्याहꣳ सवितुः सवे० ,,	,,	लिङ्गोक्तानि		
११	बृहस्पते वाजं जय० ,,	,,	,,		
१२	एषा वः सा सत्या० ,,	,,	,,		
१३	देवस्याहꣳ सवितुः सवे० ,,	,,	,,		
	वाजिनो वाजजितोऽध्वन० ,,	,,	अश्वाः		
१४	एष स्य वाजी क्षिपणिं० ,,	,,	दधिक्रावा वामदेव्यः	अश्वः	जगती
१५	उत स्मास्य द्रवतस्तुरण्यतः० ,,	,,	,,	,,	,,
१६	शं नो भवन्तु वाजिनो० ,,	,,	वसिष्ठः	,,	विराट्
४३	ते नोऽअर्वन्तो हवनश्रुतो० ,,	,,	नाभानेदिष्ठः	,,	जगती
४४	वाजेवाजेऽवत वाजिनो० ,,	,,	वसिष्ठः	,,	त्रिष्टुप्
४५	वाजो मा वाजस्य प्रसवो० ,,	,,	,,	प्रजापतिः	,,
	वाजिनो वाजजितो वाजꣳ० ,,	,,	अश्वाः		
२०	आपये स्वाहा० ,,	,,	प्रजापतिः		
२१	आयुर्यज्ञेन कल्पतां० ,,	,,	,,		
	प्रजापतेः प्रजा अभूम। स्वर्देवाऽअ० ,,	,,	यजमानः		
	अमृताऽअभूम। ,,	,,	,,		
२२	अस्मे वोऽअस्त्विन्द्रिय० ,,	,,	दिशः		

४६	ये समानाः समनसो०	,,	,,	,,		यजमानाशीः(श्रीः)	,,
४७	द्वे सृतीऽअशृण्वं०	,,	,,	,,		देवयानपितृयाणौ	त्रिष्टुप्
४८	इदꣳ हविः प्रजननं०	,,	,,	,,		यजमानाशीः	व्यवसाना अष्टिः
४९–५८	उदीरता०॥४९– आयन्तु नः०॥५८॥	,,	,,	,,	शंखः	पितरः	त्रिष्टुप्
५९	अग्निष्वात्ताः पितर एह०	,,	,,	,,	,,	,,	जगती
६०	येऽअग्निष्वात्ता येऽअनग्नि०	,,	,,	,,	,,	,,	त्रिष्टुप्
६१	अग्निष्वात्तानृतुमतो हवामहे०	,,	,,	,,	,,	,,	,,
६२	आच्या जानु दक्षिणतो	,,	,,	,,		,,	,,
६३	आसीनासो अरुणीनामु०	,,	,,	,,		,,	,,
६४	यमग्ने कव्यवाहन०	,,	,,	,,		,,	अनुष्टुप्
६५	योऽअग्निः कव्यवाहनः०	,,	,,	,,		,,	,,
६६	त्वमग्नऽईडितः कव्यवाहना०	,,	,,	,,		,,	त्रिष्टुप्
६७	ये चेह पितरो ये च नेह०	,,	,,	,,		,,	,,
६८	इदं पितृभ्यो नमोऽअस्त्वद्य०	,,	,,	,,		,,	,,
६९	अधा यथा नः पितरः०	,,	,,	,,		,,	,,
७०	उशन्तस्त्वा निधीमह्युशन्तः०	,,	,,	,,		,,	अनुष्टुप्
७१	अपां फेनेन नमुचेः०	,,	,,	,,		इन्द्रः	गायत्री
७२	सोमो राजामृतꣳ सुत०	,,	,,	,,	इन्द्रः	(ग्रहाः)	महाबृहती
७३	अद्भ्यः क्षीरं व्यपिबत्०	,,	,,	,,	,,	,,	,,
७४	सोममद्भ्यो व्यपिबत्०	,,	,,	,,	,,	,,	,,
७५	अन्नात्परिस्रुतो रसं०	,,	,,	,,	,,	,,	अतिजगती
७६	रेतो मूत्रं वि जहाति०	,,	,,	,,	,,	,, व्यवसाना	अतिशक्वरी
७७	दृष्ट्वा रूपे व्याकरोत्०	,,	,	,,	,,	,,	,,
७८	वेदेन रूपे व्यपिबत्०	,,	,,	,,	,,	,,	महाबृहती

जगत्यः ॥ ३५ ॥ [अ० १९ मं० ४९–९५]

इति० संहितायां एकोनविंशोऽध्यायः ।

क्षत्रस्य योनिर्द्विपदा गायत्र्यासन्दीदेवताका, मा त्वा कृष्णाजिनं, मृत्यो रुक्मावश्विनोर्भैषज्येन लिङ्गोक्तदेवतानि त्रीणि, कोऽसि प्राजापत्या गायत्री, शिरो मे पञ्चर्चमिन्द्रशरीरावयवदेवताकं, तृतीया गायत्र्यन्त्या महापंक्तिस्त्र्यवसानानुष्टुभोऽन्याः, प्रतिक्षत्रे वैश्वदेवं, त्रया देवा दैवी पंक्तिस्त्र्यवसाना, प्रथमा द्वितीयैर्वैश्वदेवमाशीर्लिङ्गं, लोमान्यनुष्टुब् लिङ्गोक्तदेवता ॥ ३६ ॥ [य० अ० २० मं० १–१३]

यद्देवास्तिस्रोऽग्निवायुसूर्यदेवत्या अनुष्टुभः कूष्माडीर्यद्ग्रामे लिङ्गोक्तदेवतश्च, समुद्रे ते

---

७९ दृष्ट्वा परिस्रुतो रसꣳ० प्रजापतिः अश्विनौ सरस्वती इन्द्रः (ग्रहाः) अतिजगती
८०–९५ सीसेन तन्त्रं०॥८०– तेजः पशू०॥९५॥ ,, ,, ,, अश्विसरस्वतीन्द्राः जगती

अथ० संहितायां विंशोऽध्यायः ।

	१	क्षत्रस्य योनिरसि०	प्रजापतिः,	अश्विनौ,	सरस्वती	आसन्दी	द्विपदा गायत्री
		मा त्वा हिꣳसी०	,,	,,	,,	कृष्णाजिनम्	
[अ.१०।२७]	२	निषसाद धृतव्रतो०	,,	,,	,, वरुणः,शुनःशेपः	वरुणः	गायत्री
		मृत्योः पाहि विद्योत्पाहि ।	,,	,,	,,	रुक्मौ	
	३	देवस्य त्वा सवितुः०	,,	,,	,,	सविता	
		अश्विनोर्भैषज्येन०	,,	,,	,,	लिङ्गोक्ता	
	४	कोऽसि कतमोऽसि०	,,	,,	,,	प्रजापतिः	गायत्री
	५	शिरो मे श्रीर्यशो मुखं०	,,	,,	,,	इन्द्रशरीरावयवाः	अनुष्टुप्
	६	जिह्वा मे भद्रं वाङ् महो०	,,	,,	,,	,,	,,
	७	बाहू मे बलमिन्द्रियꣳ०	,,	,,	,,	,,	गायत्री
	८	पुष्टीर्मे राष्ट्रमुदर०	,,	,,	,,	,,	अनुष्टुप्
	९	नाभिर्मे चित्तं विज्ञानं०	,,	,,	,,	,,	त्र्यवसाना महापंक्ति
	१०	प्रति क्षत्रे प्रति तिष्ठामि०	,,	,,	,,	विश्वेदेवाः	
	११	त्रया देवा एकादश०	,,	,,	,,	देवाः	त्र्यवसाना पंक्तिः
	१२	प्रथमा द्वितीयैर्द्वितीया०	,,	,,	,,	विश्वेदेवाः	
	१३	लोमानि प्रयतिर्मम०	,,	,,	,,	लिङ्गोक्ता	अनुष्टुप्
	१४	यद्देवा देवहेडनं०	,,	,,	,,	अग्निः कूष्माण्डी	अनुष्टुप्
	१५	यदि दिवा यदि नक्त०	,,	,,	,,	वायुः	,,
	१६	यदि जाग्रद्यदि स्वप्न०	,,	,,	,,	सूर्यः	,,
	१७	यद्ग्रामे यदरण्ये०	,,	,,	,,	लिङ्गोक्ता	
[अ.६मं.२२]	१८	यदापोऽअन्याऽइति०	,,	,,	,,	आपः	
	१९	समुद्रे ते हृदयमप्स्वन्तः	,,	,,	,,	आपः	द्विपदा विराट्

द्विपदा विराडार्षी, द्रुपदादिवानुष्टुवाप्युद्वयꣳ सौर्यनुष्टुप्प्रस्कण्वस्यापो अद्याग्नेयी पंक्तिरेधोऽसि समिद्देवत्ये यजुषी, समाववर्त्यनिरुक्ता गायत्री, वैश्वानर ज्योतिर्यजुरभ्यादधाम्याग्नेयं तृचमानुष्टुभमाश्वतराश्विरꣳशुना सौर्यनुष्टुप्, सिञ्चन्ति परि सौर्यैन्द्री चानुष्टुब्धानावन्तमैन्द्री गायत्री विश्वामित्रस्य च, बृहदिन्द्राय बृहती नृमेधपुरुषमेधयोरध्वर्यो गायत्री ॥ ३७ ॥ [य० अ० २० मं० १४–३१]

यो भूतानामात्मप्रवादा पंक्तिर्नारायणीया कौण्डिन्यस्य, प्राणपा मे द्वे अनुष्टुबुपरिष्टाद्बृहत्यौ लिङ्गोक्तदेवते, समिद्ध इन्द्र एकादशाग्रीस्त्रिष्टुभ आङ्गिरस इध्मस्तनूनपान्नराशꣳसः, इडो, बर्हिर्द्वार, उषासानक्ता, दैव्या होतारा, तिस्रो देवीस्त्वष्टा, वनस्पतिः, स्वाहाकृतय

२०	द्रुपदादिव मुमुचानः०	प्रजापतिः	अश्विनौ	सरस्वती		आपः	अनुष्टुप्
२१	उद्वयं तमसस्परि०	,,	,,	,,	प्रस्कण्वः	सूर्यः	,,
२२	अपोऽअद्यान्वचारिषं०	,,	,,	,,		अग्निः	पंक्तिः
२३	ऐधोऽस्येधिषीमहि०	,,	,,	,,		समित्	
	समाववर्ति पृथिवी०	,,	,,	,,		अग्निः	अनिरुक्ता गायत्री
	वैश्वानर ज्योतिर्भूयासं०	,,	,,	,,		(वैश्वानरः)	
२४	अभ्यादधामि समिधं०	,,	,,	,,	आश्वतराश्विः	अग्निः	अनुष्टुप्
२५	यत्र ब्रह्म च क्षत्रं च०	,,	,,	,,	,,	,,	,,
२६	यत्रेन्द्रश्च वायुश्च०	,,	,,	,,	,,	,,	,,
२७	अꣳशुना ते अꣳशुः	,,	,,	,,		सूर्यः	,,
२८	सिञ्चन्ति परि षिञ्च०	,,	,,	,,		,, इन्द्रः	,,
२९	धानावन्तं करम्भिणं०	,,	,,	,,	विश्वामित्रः	,,	गायत्री
३०	बृहदिन्द्राय गायत०	,,	,,	,,	नृमेधपुरुषमेधौ	(इन्द्रः)	बृहती
३१	अध्वर्योऽअद्रिभिः सुतꣳ०	,,	,,	,,		,,	गायत्री
३२	यो भूतानामधिपतिः०	,,	,,	,,	नारायणः कौण्डिन्यः	आत्मा	पंक्तिः
३३	उपयामगृहीतोऽस्यश्विभ्यां०	,,	,,	,,			
	एष ते योनिरश्विभ्यां त्वा०	,,	,,	,,		(प्रजापतिः)	(बृहती)
३४	प्राणपा मे अपानपा०	,,	,,	,,		लिङ्गोक्ता (ग्रहः)	अनुष्टुप्
३५	अश्विनकृतस्य ते०	,,	,,	,,		,,	उपरिष्टाद्बृहती
३६	समिद्धऽइन्द्रऽउषसा०	,,	,,	,,		इध्मः	त्रिष्टुप्
३७	नराशꣳसः प्रति शूरो०	,,	,,	,,		तनूनपात्, नराशंसः	,,
३८	ईडितो देवैर्हरिवाँ०	,,	,,	,,		इडः	,,
३९	जुषाणो बर्हिर्हरिवाँ०	,,	,,	,,		बर्हिः	,,
४०	इन्द्रं दुरः कवष्यः०	,,	,,	,,		द्वारः	,,
४१	उषासानक्ता बृहती०	,,	,,	,,		उषासानक्ता	,,

इत्येता आग्नीदेवता, आ यातु सप्त त्रिष्टुभ ऐन्द्र्य, आ मन्द्रैर्बृहत्यायातु वामदेवस्रातारं गर्ग, आ मन्द्रैर्विश्वामित्र,एवेद्वसिष्ठः ॥ ३८ ॥ [य० अ० २० मं० ३२–५४]

अथ हौत्रं-त्रिपशोः, समिद्धो अग्निराग्नीर्द्वादश विदर्भिरश्विसरस्वतीन्द्रदेवत्या अनुष्टुभोऽश्विना हविस्तिस्रोऽनुष्टुभ एकैकाश्विसरस्वतीन्द्रदेवत्या, य इन्द्र इन्द्रसवितृवरुणदेवत्यास्तिस्रोऽनुष्टुभोऽश्विना गोभिस्तिस्रोऽनुष्टुभो, युवं पुत्रमिवानुष्टुप्त्रिष्टुभौ, यस्मिन्नश्वास आग्नेय्यौ जगतीत्रिष्टुभावश्विना तेजसैकादशर्चंषंशस्त्रं गोमद्गृत्समदस्तृचमाश्विनं गायत्रं,

४२	दैव्या मिमाना मनुषः०	प्रजापतिः	अश्विनौ	सरस्वती	अंगिरसः	दैव्यौ होतारौ	त्रिष्टुप्
४३	तिस्रो देवीर्हविषा वर्धमा०	,,	,,	,,	,,	तिस्रो देव्यः	,,
४४	त्वष्टा दधच्छुष्ममिन्द्राय०	,,	,,	,,	,,	त्वष्टा	,,
४५	वनस्पतिरवसृष्टो न पाशै०	,,	,,	,,	,,	वनस्पतिः	,,
४६	स्तोकानामिन्दुं प्रति शूर०	,,	,,	,,	,,	स्वाहाकृतयः	,,
४७	आ यात्विन्द्रोऽवस०	,,	,,	,,	वामदेवः	इन्द्रः	,,
४८	आ नऽइन्द्रो दूरादा न०	,,	,,	,,		,,	,,
४९	आ नऽइन्द्रो हरिभि०	,,	,,	,,		,,	,,
५०	त्रातारमिन्द्रमवितार०	,,	,,	,,	गर्गः	,,	,,
५१	इन्द्रः सुत्रामा स्ववाँ२ऽअ०	,,	,,	,,		,,	,,
५२	तस्य वयꣳ सुमतौ०	,,	,,	,,		,,	,,
५३	आ मन्द्रैरिन्द्र हरिभि०	,,	,,	,,	विश्वामित्रः	,,	बृहती
५४	एवेदिन्द्रं वृषणं वज्रबाहुं०	,,	,,	,,	वसिष्ठः	,,	,,
[अथ हौत्रं अ. २० । ५५—९०]							
५५–६९	समिद्धो० ॥५५॥– तमिन्द्रं० ॥६९॥	,,	,,	,,	विदर्भिः	अश्विसरस्वतीन्द्राः	अनुष्टुप्
७०	यऽइन्द्रऽइन्द्रियं दधुः०	,,	,,	,,		इन्द्र-सवितृ-वरुणाः	,,
७१	सविता वरुणो दध०	,,	,,	,,		,,	,,
७२	वरुणः क्षत्रमिन्द्रियं०	,,	,,	,,		,,	,,
७३	अश्विना गोभिरिन्द्रिय०	,,	,,	,,		अश्विसरस्वतीन्द्राः	,,
७४	ता नासत्या सुपेशसा०	,,	,,	,,		,,	,,
७५	ता भिषजा सुकर्मणा०	,,	,,	,,		,,	,,
७६	युवꣳ सुराममश्विना०	,,	,,	,,		,,	,,
७७	पुत्रमिव पितरावश्विनो०	,,	,,	,,		,,	त्रिष्टुप्
७८	यस्मिन्नश्वासऽऋषभास०	,,	,,	,,		अग्निः	जगती
७९	अहाव्यग्ने हविरास्ये०	,,	,,	,,		,,	त्रिष्टुप्
८०	अश्विना तेजसा चक्षुः०	,,	,,	,,		अश्विसरस्वतीन्द्राः	अनुष्टुप्
८१	गोमदू षु णासत्या०	,,	,,	,,	गृत्समदः	अश्विनौ	गायत्री
८२	न यत्परो नान्तर०	,,	,,	,,	,,	,,	,,

पावका नो मधुच्छन्दाः सारस्वतमिन्द्रायाह्यैन्द्रं मधुच्छन्दा एवानुक्तमानुष्टुभमश्वि-सरस्वस्तीन्द्रदेवत्यम् ॥ ३९ ॥ [य० अ० २० मं० ५५-९०]

इति० संहितायां विंशोऽध्यायः ।

इमं मे गायत्रीत्रिष्टुभौ वारुण्यौ शुनःशेपस्त्वं नस्त्रिष्टुभावाग्निवारुण्यौ वामदेवो, महीमू षु त्रिष्टुबादित्या, सुत्रामाणं गयःप्लातः, सुनावं नौः स्वर्ग्या गायत्र्या नो मैत्रावरुणीं गायत्रीं विश्वामित्रः, प्र बाहवा वसिष्ठस्त्रिष्टुभश्छ, समिद्धो अग्निरेकादशाग्रमानुष्टुभश्छ

	८३	ता नऽआ वोढमश्विना०	प्रजापतिः	अश्विनौ	सरस्वती	गृत्समदः	अश्विनौ	गायत्री
	८४	पावका नः सरस्वती०	,,	,,	,,	मधुच्छन्दाः	सरस्वती	,,
	८५	चोदयित्री सूनृतानां०	,,	,,	,,	,,	,,	,,
	८६	महोऽअर्णः सरस्वती०	,,	,,	,,	,,	,,	,,
	८७	इन्द्रा याहि चित्रभानो०	,,	,,	,,	,,	इन्द्रः	,,
	८८	इन्द्रा याहि धियेषितो०	,,	,,	,,	,,	,,	,,
	८९	इन्द्रा याहि तूतुजान०	,,	,,	,,	,,	,,	,,
	९०	अश्विना पिबतं मधु०	,,	,,	,,		अश्विसरस्वतीन्द्राः	अनुष्टुप्

अथ० संहितायां एकविंशोऽध्यायः ।

	१	इमं मे वरुण श्रुधी०	प्रजापतिः	अश्विनौ,	सरस्वती,	शुनःशेपः	वरुणः	गायत्री
[अ.१९।४९]	२	तत्त्वा यामि ब्रह्मणा०	,,	,,	,,	,,	,,	त्रिष्टुप्
	३	त्वं नोऽअग्ने वरुणस्य०	,,	,,	,,	वामदेवः	अग्निः वरुणः	,,
	४	स त्वं नो अग्नेऽवमो०	,,	,,	,,	,,	,, ,,	,,
	५	महीमू षु मातरꣳ सुव्रता०	,,	,,	,,		अदितिः	,,
	६	सुत्रामाणं पृथिवीं द्यामने०	,,	,,	,,	गयःप्लातः	,,	,,
	७	सुनावमा रुहेयमस्रवन्ती०	,,	,,	,,		स्वर्ग्या नौः	गायत्री
	८	आ नो मित्रावरुणा०	,,	,,	,,	विश्वामित्रः	मित्रावरुणौ	,,
	९	प्र बाहवा सिसृतं जीवसे०	,,	,,	,,	वसिष्ठः	,,	त्रिष्टुप्
[अ.९।१६]	१०	शं नो भवन्तु वाजिनो०	,,	,,	,,	,,	अश्वः	विराट्
[अ.९।१८]	११	वाजेवाजेऽवत वाजिनो०	,,	,,	,,	,,	,,	त्रिष्टुप्
	१२	समिद्धोऽअग्निः समिधा०	,,	,,	,,	स्वस्त्यात्रेयः	इध्मः	अनुष्टुप्
							इन्द्रः वयोधाः	
	१३	तनूनपाच्छुचिव्रत०	,,	,,	,,	,,	,, तनूनपात् नराशंसो वा	,,
	१४	इडाभिरग्निरीड्यः०	,,	,,	,,	,,	,, इडः	,,
	१५	सुबर्हिरग्निः पूषण्वान्०	,,	,,	,,	,,	,, बर्हिः	,,
	१६	दुरो देवीर्दिशो मही०	,,	,,	,,	,,	,, द्वारः	,,
	१७	उषे यह्वी सुपेशसा०	,,	,,	,,	,,	,, उषासानक्ता	,,

स्वस्त्यात्रेयस्यार्षं वयोधा इन्द्रो देवता, वसन्तेन ऋतुना पङ्क्तिश्छन्दो लिङ्गोक्तदेवतं, होता यक्षद् द्वादशाग्रीः प्रैषा अश्विसरस्वतीन्द्रदेवत्या, आश्विनौ छागस्य सप्त लिङ्गोक्तदेवताः प्रैषा, वनस्पतिमभियूपोऽग्निꣳ स्विष्टकृदग्निर्देवं बर्हिरेकादशानुयाजप्रैषा अश्विसरस्वतीन्द्रदेवत्या, अग्निमद्य सूक्तवाकप्रैषो लिङ्गोक्तदेवतो लिङ्गोक्तदेवतः ॥ ४० ॥ [य० अ० २१ मं० १-६१]

इति० संहितायामेकविंशोऽध्यायः ।

इति सर्वानुक्रमसूत्रे द्वितीयोऽध्यायः ।

अथ तृतीयोऽध्यायः ।

अथाश्वमेधश्चतुरोऽध्यायान्प्रजापतिरपश्यत्, तेजोऽसि सौवर्णं निष्कमिमामगृभ्णन्त्संवत्सरो यज्ञपुरुषस्त्रिष्टुभमभिधा लिङ्गोक्तानि, यो अर्वन्तं गायत्र्यर्धेनाश्वस्तुतिः परोऽर्द्धो

१८	दैव्या होतारा भिष०	प्रजापतिः	अश्विनौ	सरस्वती	,,	,,	दैव्यौ होतारौ	अनुष्टुप्
१९	तिस्रऽइडा सरस्वती०	,,	,,	,,	,,	,,	तिस्रो देव्यः	,,
२०	त्वष्टा तुरीपोऽअद्भुत०	,,	,,	,,	,,	,,	त्वष्टा	,,
२१	शमिता नो वनस्पतिः०	,,	,,	,,	,,	,,	वनस्पतिः	,,
२२	स्वाहा यज्ञं वरुणः०	,,	,,	,,	,,	,,	स्वाहाकृतयः	,,
२३-२८	वसन्तेन०॥२३॥- शैशिरेण० ॥२८॥	,,	,,	,,		,,	लिङ्गोक्ता	,,
२९--४०	होता ०॥२९॥- होता यक्षदग्नि०॥४०॥	,,	,,	,,			अश्विसरस्वतीन्द्राः	
४१-४५	होता०॥४१॥- होता यक्षदिन्द्र०॥४५॥	,,	,,	,,			लिङ्गोक्ता	
४६	होता यक्षद्वनस्पति०	,,	,,	,,			यूपः	
४७	होता यक्षदग्निꣳ०	,,	,,	,,			स्विष्टकृदग्निः	
४८-५८	देवं बर्हिः०॥४८॥-देवोऽअग्निः०॥५८॥	,,	,,	,,			अश्विसरस्वतीन्द्राः	
५९-६१	अग्निमद्य०॥५९॥- त्वामद्य०॥६१॥	,,	,,	,,			लिङ्गोक्ता	

इति सर्वानुक्रमसूत्रे द्वितीयोऽध्यायः ।

अथ सर्वानुक्रमसूत्रे तृतीयोऽध्यायः ।

अथ० संहितायां द्वाविंशोऽध्यायः । [अथ अश्वमेधः । अ० २२- अ०२५]

१	तेजोऽसि शुक्रममृत०	प्रजापतिः		सौवर्णं निष्कं	
२	इमामगृभ्णन्रशनामृतस्य०	,,	संवत्सरो यज्ञपुरुषः	(रशना)	त्रिष्टुप्
३-४	अभिधा असि०॥३॥- स्वगा त्वा०॥४॥	,,		लिङ्गोक्ता	
५	प्रजापतये त्वा जुष्टं०	,,		,,	
	योऽअर्वन्तं जिघाꣳसति०	,,		अश्वः	गायत्री

लिङ्गोक्तोऽग्नये लिङ्गोक्तान्येव, हिङ्कारायेत्यश्वस्यैकान्नपञ्चाशच्चेष्टितानि, हिरण्यपाणिं पञ्चर्चꣳ सावित्रं गायत्रमाद्यां मेधातिथिरग्निꣳ स्तोमेनाग्नेयं तृचं गायत्रꣳ सुतंभरो विश्वामित्रो विरूपो यथासंख्यमजीजनो हि पावमानीं कृतिं पिपीलिकमध्यामनुष्टुभं त्र्यरुणत्रसदस्यू, विभूरश्वदैवतं, देवा दैवमिह रन्तिराग्नेयानि चत्वारि, कायौद्रभणानि लिङ्गोक्तान्याब्रह्मँ लिङ्गोक्तान्येवाध्यायात् ॥ १ ॥ [य० अ० २२ मं० १-३४]

इति० संहितायां द्वाविंशोऽध्यायः ।

प्रजापतये प्राजापत्यं, यस्ते दैवं, यः प्राणतस्त्रिष्टुप्कायी हिरण्यगर्भस्य, युञ्जन्ति मधुच्छन्दा आदित्यदेवत्यां गायत्रीं, युञ्जन्त्यस्याश्वस्तुतिर्यद्वातो बृहती, वसवस्त्वा

	परो मर्तः परः श्वा०	प्रजापतिः		लिङ्गोक्ता	गायत्री
६	अग्नये स्वाहा सोमाय०	,,		,, (अग्न्यादयः)	
७-८	हिङ्काराय स्वाहा०॥७॥- यते स्वाहा०॥८॥	,,		अश्वः	
[अ.३ मं.३५] ९	तत्सवितुर्वरेण्यं०	,,	विश्वामित्रः	सविता	,,
१०	हिरण्यपाणिमूतये०	,,	मेधातिथिः	,,	,,
११-१४	देवस्य चेततो०॥११॥- देवस्य स०॥१४	,,		,,	,,
१५	अग्निꣳ स्तोमेन बोधय०	,,	सुतंभरः	अग्निः	,,
१६	स हव्यवाडमर्त्य०	,,	विश्वामित्रः	,,	,,
१७	अग्निं दूतं पुरो दधे०	,,	विरूपः	,,	,,
१८	अजीजनो हि पवमान०	,,	त्र्यरुणत्रसदस्यू	पवमानः	पिपीलिकमध्या कृतिः अनुष्टुप्
१९	विभूर्मात्रा प्रभूः पित्रा०	,,		अश्वः	
	देवाऽआशापालाऽएतं०	,,		देवाः	
	इह रन्तिरिह रमता०	,,		अग्निः	
२०	काय स्वाहा कस्मै स्वाहा०	,,		लिङ्गोक्ता	
[अ.४ मं.८] २१	विश्वो देवस्य नेतु०	,,	स्वस्त्यात्रेयः	सविता	अनुष्टुप्
२२-३४	आ ब्रह्मन्०॥२२-एकस्मै स्वाहा०॥३४॥	,,		लिङ्गोक्ता	

अथ० संहितायां त्रयोविंशोऽध्यायः ।

[अ.१३।४] १	हिरण्यगर्भः समवर्तताग्रे०	प्रजापतिः, हिरण्यगर्भः		कः	त्रिष्टुप्
२	उपयामगृहीतोऽसि प्रजापतये०	,,		प्रजापतिः	
	यस्तेऽहन्त्संवत्सरे महिमा०	,,		देवाः	
३	यः प्राणतो निमिषतो महित्वैक०	,,	हिरण्यगर्भः	कः	त्रिष्टुप्
[अ.२३।२] ४	उपयामगृहीतोऽसि प्रजापतये०	,,		प्रजापतिः	
	यस्ते रात्रौ संवत्सरे महिमा०	,,		देवाः	
५	युञ्जन्ति ब्रध्नमरुषं०	,,	मधुच्छन्दाः	आदित्याः	गायत्री

लिङ्गोक्तानि, लाजी ३ नश्वदेवत्यं, कः स्विच्चतस्रोऽनुष्टुभः प्रश्नप्रतिप्रश्नभूता ब्रह्मोद्ये होतुर्ब्रह्मणश्च, वायुष्ट्वा लिङ्गोक्तानि, सꣳ शितस्तिस्रोऽश्वदेवत्या अनुष्टुब्विराट्त्रिष्टुभोऽग्निः पशुराश्वानि त्रीण्यम्बेऽनुष्टुब्बश्वस्तुतिर्गणानां त्वा चत्वारि लिङ्गोक्तानि ॥ २ ॥ [य० अ० २३ मं० १–२०]

उत्सक्थ्या गायत्र्याश्वी, यका दशर्चमानुष्टुभं, द्वितीया तूपरिष्टाद्बृहत्यध्वर्य्वादीनां कुमार्यादिभिरश्लीलभाषणं ता एव देवता, दधिक्राव्णो दधिक्रावा वामदेव्यः सुराभिमती-

	६ युञ्जन्त्यस्य काम्या हरी०	प्रजापतिः	अश्वः	गायत्री
	७ यद्वातोऽअपोऽअगनीगन्०	,,	,,	बृहती
	८ वसवस्त्वाञ्जन्तु गायत्रेण छन्दसा०	,,	लिङ्गोक्ता	
	लाजी३ ल्छाची३ न्यब्ये०	,,	अश्वः	
	९ कः स्विदेकाकी चरति०	,,	प्रश्नः	अनुष्टुप्
	१० सूर्यऽएकाकी चरति०	,,	प्रतिप्रश्नः	,,
	११ का स्विदासीत्पूर्वचित्ति०ः	,,	प्रश्नः	,,
	१२ द्यौरासीत्पूर्वचितिः०	,,	प्रतिप्रश्नः	,,
	१३ वायुष्ट्वा पचतैरवत्वसित०	,,	लिङ्गोक्ता (अश्वः)	
	१४ सꣳशितो रश्मिना रथः०	,,	अश्वः	अनुष्टुप्
	१५ स्वयं वाजिंस्तन्वं कल्पयस्व०	,,	,,	विराट्
	१६ न वाऽउ एतन्म्रियसे न रिष्यसि०	,,	,,	त्रिष्टुप्
	१७ अग्निः पशुरासीत्तेनायजन्त०	,,	,,	
[अ.२२।२३]	१८ प्राणाय स्वाहापानाय स्वाहा०	,,	लिङ्गोक्ता	
	अम्बेऽअम्बिकेऽम्बालिके०	,,	,,	अनुष्टुप्
	१९ गणानां त्वा गणपतिꣳ०	,,	,,	
	२० ताऽउभौ चतुरः पदः०	,,	,,	
	२१ उत्सक्थ्याऽ अवगुदं देहि०	,,	अश्वः	गायत्री
	२२ यकासकौ शकुन्तिका०	,,	कुमारी	अनुष्टुप्
	२३ यकोऽसकौ शकुन्तक०	,,	अध्वर्युः	उपरिष्टाद्बृहती
	२४ माता च ते पिता च तेऽग्रं०	,,	महिषी	अनुष्टुप्
	२५ माता च ते पिता च तेऽग्रे०	,,	ब्रह्मा	,,
	२६ ऊर्ध्वामेनामुच्छ्रापय०	,,	वावाता	,,
	२७ ऊर्ध्वमेनमुच्छ्रयताद्०	,,	उद्गाता	,,
	२८ यदस्या अꣳहुभेद्या०	,,	परिवृक्ता	,,
	२९ यद्देवासो ललामगुं०	,,	होता	,,
	३० यद्धरिणो यवमत्ति०	,,	पालागली	,,
	३१ यद्धरिणो यवमत्ति०	,,	क्षत्ता	,,

मनुष्टुभमार्श्वी गायत्रीछं पङ्क्तिमाश्वमुष्णिगाद्याश्चतस्रोऽनुष्टुभोऽन्त्या त्रिष्टुप्, कस्त्वा पङ्क्तिमाश्वमाद्या गायत्री पञ्चानुष्टुभः, कः स्विदष्टादशर्चं ब्रह्मोद्यछं होत्रादीनां प्रश्नप्रतिप्रश्नभूतमाद्याश्चतस्रोऽनुष्टुभः का स्विदाद्याश्चतस्रश्चान्त्या दश त्रिष्टुभः, सुभूरनुष्टुब् लिङ्गोक्तदेवता, होता यक्षत्प्राजापत्यः प्रैषः, प्रजापते हिरण्यगर्भः प्राजापत्यां त्रिष्टुभम् ॥ ३ ॥ [य० अ० २३ मं० २१–६५]

इति० संहितायां त्रयोविंशोऽध्यायः ।

अश्वस्तूपर इत्यादयः पशवोऽध्यायेनोक्ता देवता वा पर्यङ्क्यास्तथा रोहितादयो गुणयुक्ता आरण्याश्च कपिञ्जलादय आध्यायाच्छादं दद्भिरित्यादि त्वगित्येतदन्तं द्रव्यदैवतमुक्तम् ॥ ४ ॥ [य० अ० २४ मं० १–४०]

इति० संहितायां चतुर्विंशोऽध्यायः ॥

अश्वस्तूपरो ब्राह्मणोऽध्यायः, शादं दद्भिस्त्वचान्तश्च । जुम्बकाय वारुणीं द्विपदां मुण्डिभ औदन्य एषा चाघनाशिन्यन्तर्जले, यस्येमे काण्यौ त्रिष्टुभौ हिरण्यगर्भः प्राजापत्य,

३२	दधिक्राव्णोऽअकारिषं०	प्रजापतिः दधिक्रावा वामदेव्यः	अश्वः	अनुष्टुप्
३३	गायत्री त्रिष्टुब्जगत्यनुष्टुप्०	,,	,,	उष्णिक्
३४–३७	द्विपदा या०॥३४॥– रजता हरिणीः॥३७॥	,,	,,	अनुष्टुप्
३८	कुविदङ्ग यवमन्तो यवं०	,,	,,	त्रिष्टुप्
३९	कस्त्वा च्छ्यति कस्त्वा०	,,	,,	गायत्री
४०–४४	ऋतवस्त०॥४०॥– शं ते परेभ्यो०॥४४॥	,,	,,	अनुष्टुप्
[अ.२३।९] ४५	कः स्विदेकाकी चरति०	,,	प्रश्नः	अनुष्टुप्
[अ.२३।१०] ४६	सूर्यऽएकाकी चरति०	,,	प्रतिप्रश्नः	,,
४७–४८	किꣳस्वित्०॥४७॥– ब्रह्म सूर्य०॥४८॥	,,		,,
४९–५२	पृच्छामि०॥४९॥– पञ्चस्वन्तः०॥५२॥	,,		त्रिष्टुप्
५३–५६	का स्वि०॥५३॥– अजारे०॥५६॥	,,		अनुष्टुप्
५७–६२	कत्यस्य० ॥५७॥– इयं वेदिः०॥६२॥	,,		त्रिष्टुप्
६३	सुभूः स्वयंभूः प्रथमो०	,,	लिङ्गोक्ता	अनुष्टुप्
६४	होता यक्षत्प्रजापतिꣳ०	,,	प्रजापतिः	
[अ.१०।२०] ६५	प्रजापते न त्वदेता०	,, हिरण्यगर्भः	,,	त्रिष्टुप्
	अथ० संहितायां चतुर्विंशोऽध्यायः ।			
१–४०	अश्वस्तूपरो० ॥१॥– खड्गो वैश्वदेवः०॥४०॥	प्रजापतिः	(प्रजापत्यादयः)	
	अथ० संहितायां पञ्चविंशोऽध्यायः ।			
१–९	शादं दद्भि०॥१॥–विष्टतिं नाभ्या घृतꣳ०	प्रजापतिः	(शादादयः)	
	जुम्बकाय स्वाहा ।	,, मुण्डिभः औदन्यः	वरुणः	

आ नो दशर्चं जागतं वैश्वदेवं गोतमः, स्वस्ति नो विराट्स्थाना, भद्रं कर्णेभिस्तृचं त्रैष्टुभं, मा नोऽश्वस्तोमीयं दीर्घतमास्त्रैष्टुभं द्वाविंशत्यृचमश्वस्तुतिस्तृतीयापष्ठ्यौ जगत्यावि॒मा नु द्वैपदं वैश्वदेवं तृचं भौवन आप्त्यो वा साधनो भौवनो वा ॥ ५ ॥ [य० अ० मं० २५ । १–४७]

इति० संहितायां पञ्चविंशोऽध्यायः ।

अग्निश्च सप्त लिङ्गोक्तानि, प्रियो देवानां लौगाक्षिरनुष्टुभमनवसानां, बृहस्पते गृत्समदो ब्राह्मीं त्रिष्टुभमिन्द्र गोमन्नेन्द्र्यौ गायत्र्यौ रम्याक्षिर्ऋतावानं प्रादुराक्षिर्वैश्वानरीयां,

[अ.१३।४] १०	हिरण्यगर्भः समवर्तताग्रे०	प्रजापतिः हिरण्यगर्भः	कः		त्रिष्टुप्
[अ.२३।१]					
[अ.२३।३] ११	यः प्राणतो निमिषतो०	,, ,,	,,		,,
१२	यस्येमे हिमवन्तो महित्वा०	,, प्राजापत्यः हिरण्यगर्भः	,,		,,
१३	यऽआत्मदा बलदा यस्य विश्व०	,, ,, ,,	,,		,,
१४–१८	आ नो भद्राः० ॥१४॥– तमीशानं०॥१८॥	,, गोतमः	विश्वेदेवाः		जगती
१९	स्वस्ति न इन्द्रो वृद्धश्रवाः०	,, ,,	,,		विराट्स्थाना
२०	पृषदश्वा मरुतः पृश्निमातरः०	,, ,,	,,		जगती
२१–२३	भद्रं कर्णेभिः०॥२१॥– अदितिर्द्यौ०॥२३॥	,, ,,	,,		त्रिष्टुप्
२४	मा नो मित्रो वरुणो०	,, दीर्घतमाः	अश्वः		,,
२५	यन्निर्णिजा रेक्णसा०	,, ,,	,,		,,
२६	एष छागः परोऽअश्वेन वाजिना०	,, ,,	,,		जगती
२७	यद्धविष्यमृतुशो देवयानं०	,, ,,	,,		त्रिष्टुप्
२८	होताध्वर्युरावयाऽअग्निमिन्धो०	,, ,,	,,		,,
२९	यूपव्रस्काऽउत ये यूपवाहा०	,, ,,	,,		जगती
३०–४५	उप प्रागात्सुम०॥३०॥– सुगव्यं नो०॥४५॥	,, ,,	,,		त्रिष्टुप्
४६	इमा नु कं भुवना सीषधामे०	,, भौवनः आप्त्यः, वा भौवनः साधनो वा	विश्वेदेवाः		द्विपदा
[अ.३मं.२५] ४७	अग्ने त्वं नोऽअन्तम०	,, देवाः बन्धुः	अग्निः		द्विपदा विराट्
	वसुरग्निर्वसुश्रवाः०	,, ,, सुबन्धुः	,,		,,
[अ.३।२६]	तं त्वा शोचिष्ठ दीदिवः	,, ,, श्रुतबन्धुः	,,		,,

[इत्यश्वमेधः समाप्तः]

अथ० संहितायां षड्विंशोऽध्यायः ।

१	अग्निश्च पृथिवी च सन्नते०	विवस्वान्	लिङ्गोक्ता	
२	यथेमां वाचं कल्याणी०	,,	,,	
	प्रियो देवानां दक्षिणायै दातु०	लोगाक्षिः	,,	अनवसाना अनुष्टुप्
३	बृहस्पतेऽअति यदर्योऽअर्हाद्०	गृत्समदः	ब्रह्मा	त्रिष्टुप्

वैश्वानरस्य त्रिष्टुभं कुत्सोऽग्निर्ऋषिराग्नेयीं गायत्रीं वसिष्ठभरद्वाजौ, महाँऽइन्द्रो माहेन्द्रीं वसिष्ठस्तं व ऐन्द्रीं पथ्याबृहतीं नोधागोतमो, यद्वाहिष्ठं वसूयव आग्नेयीमनुष्टुभमेहि भरद्वाजो गायत्रीमृतवस्ते बृहतीमुपह्वरे वत्सो गायत्रीम् ॥ ६ ॥ [य० अ० २६ । मं० १–१५]

उच्चा ते गायत्रं तृचꣳ, सौम्यमामहीवयोऽनु वीरैर्मुद्गलो यज्ञपुरुषास्त्रिष्टुभमग्ने पत्नीर्मेधातिथिराग्नेयीं गायत्रीमभि यज्ञं द्व्यृचमृतुदैवतं मेधातिथिस्तवायमैन्द्रीं त्रिष्टुभं विश्वामित्रोऽमेव नो जगतीं गृत्समदः, स्वादिष्ठया मधुच्छन्दाः सौम्यावनुक्तानां गायत्रम् ॥ ७ ॥ [य० अ० २६ मं० १६--२६]

इति० संहितायां षड्विंशोऽध्यायः ।

४	इन्द्र गोमन्निहा याहि०	रम्याक्षिः	इन्द्रः	गायत्री
५	इन्द्रा याहि वृत्रहन्०	,,	,,	,,
६	ऋतावानं वैश्वानर०	प्रादुराक्षिः	वैश्वानरः	,,
७	वैश्वानरस्य सुमतौ स्याम०	कुत्सः	,,	त्रिष्टुप्
८	वैश्वानरो नऽऊतये०	वसिष्ठभरद्वाजौ	,,	गायत्री
९	अग्निर्ऋषिः पवमानः०	,,	अग्निः	,,
१०	महाँऽइन्द्रो वज्रहस्तः०	वसिष्ठः	महेन्द्रः	,,
११	तं वो दस्ममृतीषहं०	नोधागोतमः	इन्द्रः	पथ्याबृहती
१२	यद्वाहिष्ठं तदग्नये०	वसूयवः	अग्निः	अनुष्टुप्
१३	एह्यू षु ब्रवाणि ते०	भरद्वाजः	,,	गायत्री
१४	ऋतवस्ते यज्ञं वितन्वन्तु०		,,	बृहती
१५	उपह्वरे गिरीणां०	वत्सः	सोमः	गायत्री
१६	उच्चा ते जातमन्धसो०	आमहीयवः	,,	,,
१७	स नऽइन्द्राय यज्यवे०	,,	,,	,,
१८	एना विश्वान्यर्यऽआ०	,,	,,	,,
१९	अनु वीरैरनु पुष्यास्म गोभि०	मुद्गलो यज्ञपुरुषः	(देवाः)	त्रिष्टुप्
२०	अग्ने पत्नीरिहा वह०	मेधातिथिः	अग्निः	गायत्री
२१	अभि यज्ञं गृणीहि नो०	,,	ऋतुः	,,
२२	द्रविणोदाः पिपीषति०	,,	,,	,,
२३	तवायꣳ सोमस्त्वमेह्यर्वाङ्०	विश्वामित्रः	इन्द्रः	त्रिष्टुप्
२४	अमेव न सुहवा आ हि०	गृत्समदः	(त्वष्टा)	जगती
२५	स्वादिष्ठया मदिष्ठया०	मधुच्छन्दाः	सोमः	गायत्री
२६	रक्षोहा विश्वचर्षणि०	,,	,,	,,

समास्त्वाग्निकोऽध्यायः प्रजापतेरार्षं, सामिधेन्यो नवाग्नेय्यस्त्रिष्टुभोऽग्निना दृष्टा, अग्निर्ऋषिः कर्माङ्गभूतमग्निष्टं स्तौत्यूर्ध्वा द्वादशर्चमाग्रियमौष्णिहं विषमपदं प्राजापत्यमाग्नेयमग्निरपश्यदग्निर्हि प्रजापतित्वेन संस्तूयते तेन प्राजापत्यम् ॥ ८ ॥ [य० अ० २७ मं० १--२२]

पीवो अन्ना द्वे वायव्ये त्रिष्टुभौ वसिष्ठ, आपो ह द्वे प्राजापत्ये हिरण्यगर्भः प्राजापत्यः, प्र याभिर्द्वे वायव्ये वसिष्ठो, नियुत्वान् वायव्याः षड्, वायो शुक्रोऽनुष्टुबेकया च त्रिष्टुबन्या गायत्र्यो, नियुत्वान् वायो गृत्समदो, वायो शुक्रः पुरुमीढाजमीढौ, तव

अथ० संहितायां सप्तविंशोऽध्यायः ।

[आग्निकोऽध्यायः—]

१—९ समास्त्वाग्न०॥१॥-अमुत्रभूया०॥९॥	प्रजापतिः,	अग्निः			अग्निः	त्रिष्टुप्
[अ.२०।२१] १० उद्वयं तमसस्परि०	,,	,,	प्रस्कण्वः		सूर्यः	अनुष्टुप्
११ ऊर्ध्वोऽअस्य समिधो०	,,	,,	अग्निः,	प्रजापतिः इध्मः		विषमपदा उष्णिक्
१२ तनूनपादसुरो विश्ववेदा०	,,	,,	,,	,,	तनूनपात्	,,
१३ मध्वा यज्ञं नक्षसे प्रीणानो०	,,	,,	,,	,,	नराशंसः।	,,
१४ अच्छायमेति शवसा घृतेन०	,,	,,	,,	,,	इडः	,,
१५ स यक्षदस्य महिमान०	,,	,,	,,	,,	बर्हिः	,,
१६ द्वारो देवीरन्वस्य विश्वे०	,,	,,	,,	,,	द्वारः	,,
१७ तेऽअस्य योषणे दिव्ये०	,,	,,	,,	,,	उषासानक्ता	,,
१८ दैव्या होताराऽऊर्ध्वमध्वरं०	,,	,,	,,	,,	दैव्याहोतारा	,,
१९ तिस्रो देवीर्बर्हिरेदꣳसद०	,,	,,	,,	,,	तिस्रो देव्यः	,,
२० तन्नस्तुरीपमद्भुतं पुरुक्षु०	,,	,,	,,	,,	त्वष्टा	,,
२१ वनस्पतेऽव सृजा रराण०	,,	,,	,,	,,	वनस्पतिः	,,
२२ अग्ने स्वाहा कृणुहि जातवेद०	,,	,,	,,	,,	स्वाहाकृतयः	,,
२३ पीवो अन्ना रयिवृधः०	,,	वसिष्ठः			वायुः	त्रिष्टुप्
२४ राये नु यं जज्ञतू रोदसीमे०	,,	,,			,,	,,
२५ आपो ह यद्बृहतीर्विश्वमा०	,,	हिरण्यगर्भः	प्राजापत्यः		प्रजापतिः	,,
२६ यश्चिदापो महिना पर्यप०	,,	,,	,,		,,	,,
२७ प्र याभिर्यासि दाश्वाꣳस०	,,	वसिष्ठः			वायुः	,,
२८ आ नो नियुद्भिः शतिनी०	,,	,,			,,	,,
२९ नियुत्वान्वायवागह्ययꣳ०	,,	गृत्समदः			,,	गायत्री
३० वायो शुक्रो अयामि ते०	,,	पुरुमीढाजमीढौ			,,	अनुष्टुप्
३१ वायुरग्रेगा यज्ञप्रीः०	,,				,,	गायत्री
३२ वायो ये ते सहस्रिणो०	,,	गृत्समदः			,,	,,

वायो व्यश्व आङ्गिरसोऽभि त्वा वसिष्ठ ऐन्द्रं प्रगाथं, प्रथमा बृहती, द्वितीया सतोबृहती, त्वामिदेवꣳ शंयुर्बार्हस्पत्यः, कया न ऐन्द्रं तृचं गायत्रं वामदेवोऽन्त्या तु पादनिचृद्यज्ञा यज्ञा व ऊर्जो नपातꣳ शंयुः, पाहि नो गर्भः प्रगाथ, एतं तृचं प्रगाथमाग्नेयं, द्वे बृहत्यौ तृतीया सतोबृहती, संवत्सरोऽस्याग्नेयम् ॥ ९॥ [य० अ० २७ मं.१३-४५]

इति० संहितायां सप्तविंशोऽध्यायः ।

इन्द्रमिडः सौत्रामणिकोऽध्याय, एकादश प्रयाजप्रैषा ऐन्द्रा आप्रीदेवत्या आद्येऽनुवाके, देवं बर्हिरनुयाजप्रैषा ऐन्द्रा एकादशैवाग्निमद्यैन्द्रः सूक्तवाकप्रैषस्त्वामद्य प्रतीक उभयत्रापि,

३३ एकया च दशभिश्च०	प्रजापतिः	वायुः	त्रिष्टुप्
३४ तव वायवृतस्पते०	,, व्यश्वः आङ्गिरसः	,,	गायत्री
३५ अभि त्वा शूर नोनुमो०	,, वसिष्ठः	इन्द्रः	बृहती
३६ न त्वावाँ २ऽ अन्यो०	,, ,,	,,	सतोबृहती
३७ त्वामिद्धि हवामहे०	,, शंयुःबार्हस्पत्यः	,,	बृहती
३८ स त्वं नश्चित्र वज्रहस्त	,, ,,	,,	सतोबृहती
३९-४० कया न०॥३९॥- कस्त्वा० ॥४९॥	,, वामदेवः	,,	गायत्री
४१ अभी षु णः सखीना०	,, ,,	,,	पादनिचृत् ,,
४२ यज्ञा यज्ञा व अग्नये०	,, शंयुः	अग्निः	बृहती
४३ पाहि नो अग्न एकया०	,,	,,	,,
४४ ऊर्जो नपातꣳ स हिनाय०	,, शंयुः	,,	सतोबृहती
४५ संवत्सरोऽसि परिवत्सरोऽसी०	,,	,,	

अथ० संहितायां अष्टाविंशोऽध्यायः । [सौत्रामणिकोऽध्यायः ।]

१ होता यक्षत्समिधेन्द्र०	प्रजापतिः अश्विनौ सरस्वती	इध्मः
२ होता यक्षत्तनूनपातमूतिभि०	,, ,, ,,	तनूनपात्
३ होता यक्षदिडाभिरिन्द्र०	,, ,, ,,	इडः
४ होता यक्षद्बर्हिषीन्द्रं निषद्वरं०	,, ,, ,,	बर्हिः
५ होता यक्षदोजो न वीर्यꣳ	,, ,, ,,	द्वारः
६ होता यक्षदुषे इन्द्रस्य धेनू०	,, ,, ,,	उषासानक्ता
७ होता यक्षद्दैव्या होतारा०	,, ,, ,,	दैव्या होतारा
८ होता यक्षत्तिस्रो देवीर्न०	,, ,, ,,	तिस्रो देव्यः
९ होता यक्षत्त्वष्टारमिन्द्रं देवं०	,, ,, ,,	त्वष्टा
१० होता यक्षद्वनस्पतिꣳ०	,, ,, ,,	वनस्पतिः
११ होता यक्षदिन्द्रꣳ स्वाहा०	,, ,, ,,	स्वाहाकृतयः
१२ देवं बर्हिरिन्द्रꣳ सुदेवं०	,, ,, ,,	बर्हिः
१३ देवीर्द्वार इन्द्रꣳ सङ्घाते०	,, ,, ,,	द्वारः
१४ देवीऽउषासानक्तेन्द्रं यज्ञे०	,, ,, ,,	उषासानक्ता

समिधानं महद्वायोधस आग्रिय एकादश प्रयाजप्रैषास्तथैव देवं बर्हिरनुयाजप्रैषा, अग्नि मद्य वायोधसः सूक्तवाकप्रैषः ॥ १० ॥ [य० अ० २८ मं० १--४६]

इति० संहितायां अष्टाविंशोऽध्यायः ।

	१५ देवी जोष्ट्री वसुधिती०	प्रजापतिः	अश्विनौ	सरस्वती	(द्यावापृथिव्यौ अहोरात्रे वा)
	१६ देवी ऊर्जाहुती दुघे०	,,	,,	,,	
	१७ देवा देव्या होतारा०	,,	,,	,,	(एकः पार्थिवोऽग्निः अन्यो मध्यमः)
	१८ देवीस्तिस्रस्तिस्रो देवीः०	,,	,,	,,	तिस्रो देव्यः
	१९ देव इन्द्रो नराशꣳस०	,,	,,	,,	(यज्ञः)
	२० देवो देववनस्पति०	,,	,,	,,	(यूपः)
	२१ देवं बर्हिर्वारितीनां०	,,	,,	,,	बर्हिः
	२२ देवो अग्निः स्विष्टकृत्०	,,	,,	,,	स्विष्टकृत् अग्निः
[अ.२१।५९]	२३ अग्निमद्य होतारमवृणीतायं०	,,	,,	,,	लिङ्गोक्ता
	२४ होता यक्षत्समिधानं०	,,	,,	,,	समित्
	२५ होता यक्षत्तनूनपातमुद्भिदं०	,,	,,	,,	तनूनपात्
	२६ होता यक्षदीडेन्यमीडितं०	,,	,,	,,	इडः
	२७ होता यक्षत्सुबर्हिषं०	,,	,,	,,	बर्हिः
	२८ होता यक्षद्व्यचस्वतीः०	,,	,,	,,	द्वारः
	२९ होता यक्षत्सुपेशसा सुशिल्पे०	,,	,,	,,	उषासानक्ता
	३० होता यक्षत्प्रचेतसा०	,,	,,	,,	देव्या होतारा
	३१ होता यक्षत्पेशस्वतीस्तिस्रो०	,,	,,	,,	तिस्रो देव्यः
	३२ होता यक्षत्सुरेतसं०	,,	,,	,,	त्वष्टा
	३३ होता यक्षद्वनस्पतिं०	,,	,,	,,	वनस्पतिः
	३४ होता यक्षत्स्वाहाकृतीरग्निं०	,,	,,	,,	स्वाहाकृतयः
	३५ देवं बर्हिर्वयोधसं०	,,	,,	,,	बर्हिः
	३६ देवीर्द्वारो वयोधसं०	,,	,,	,,	द्वारः
	३७ देवी उषासानक्ता०	,,	,,	,,	उषासानक्ता
	३८ देवी जोष्ट्री वसुधिती०	,,	,,	,,	(द्यावापृथिवी अहोरात्रे वा)
	३९ देवी ऊर्जाहुती दुघे०	,,	,,	,,	
	४० देवा दैव्या होतारा०	,,	,,	,,	दैव्या होतारा
	४१ देवीस्तिस्रस्तिस्रो देवी०	,,	,,	,,	तिस्रो देव्यः
	४२ देवो नराशꣳसो देवमिन्द्रः०	,,	,,	,,	नराशंसः
	४३ देवो वनस्पतिर्देवमिन्द्रं०	,,	,,	,,	वनस्पतिः
	४४ देवं बर्हिर्वारितीनां०	,,	,,	,,	बर्हिः
	४५ देवोऽग्निः स्विष्टकृत्०	,,	,,	,,	स्विष्टकृत्
[अ.२१।५९-६१]	४६ अग्निमद्य होतारमवृणीतायं०	,,	,,	,,	लिङ्गोक्ता

समिद्धोअञ्जन्नाश्वमेधिकोऽध्याय, आद्या आप्रीस्त्रिष्टुभ एकादशाश्वस्तुतिर्बृहदुक्थो वामदेव्यो ददर्शाश्वो वा सामुद्रिर्यदक्रन्दस्त्रयोदशाश्वस्तुतिस्त्रिष्टुभो भार्गवो जमदग्निर्ददर्श दीर्घतमाश्च, समिद्धो अद्य द्वादशाप्रीस्त्रिष्टुभो जमदग्निः ॥ ११ ॥ [य० अ० २९ मं० १–३६]

केतुं कृण्वन्नाग्नेयीमनिरुक्तां गायत्रीं मधुच्छन्दा, जीमूतस्येव पायुर्भारद्वाजः संग्रामा-

अथ० संहितायां एकोनत्रिंशोऽध्यायः ।

[आश्वमेधिकोऽध्यायः]

१ समिद्धोऽअञ्जन्कृदरं०	प्रजापतिः	बृहदुक्थो,	वामदेव्यः	अश्वः	सामुद्रिः	समित्	त्रिष्टुप्
२ घृतेनाञ्जन्सं पथो०	,,	,,	,,	,,	,,	तनूनपात्	,,
३ ईड्यश्चासि वन्द्यश्च०	,,	,,	,,	,,	,,	नराशंसः	,,
४ स्तीर्णं बर्हिः सुष्टुरीमा०	,,	,,	,,	,,	,,	बर्हिः	,,
५ एताऽउ वः सुभगा०	,,	,,	,,	,,	,,	द्वारः	,,
६ अन्तरा मित्रावरुणा०	,,	,,	,,	,,	,,	उषासानक्ता	,,
७ प्रथमा वाꣳ सरथिना०	,,	,,	,,	,,	,,	देव्या होतारा	,,
८ आदित्यैर्नो भारती०	,,	,,	,,	,,	,,	तिस्रो देव्यः	,,
९ त्वष्टा वीरं देवकामं०	,,	,,	,,	,,	,,	त्वष्टा	,,
१० अश्वो घृतेन त्मन्या०	,,	,,	,,	,,	,,	वनस्पतिः	,,
११ प्रजापतेस्तपसा०	,,	,,	,,	,,	,,	स्वाहाकृतयः	,,
१२–२४यदक्रन्दः०॥१२–उप प्रागा०॥२४॥	,,	भार्गवो	जमदग्निः	दीर्घतमाः		अश्वः	,,
२५ समिद्धोऽअद्य मनुषो	प्रजापतिः	जमदग्निः				समित्	त्रिष्टुप्
२६ तनूनपात्पथऽऋतस्य०	,,	,,				तनूनपात्	,,
२७ नराशꣳसस्य महिमानमेषा०	,,	,,				नराशंसः	,,
२८ आजुह्वान ईड्यो वन्द्यश्चा०	,,	,,				इडः	,,
२९ प्राचीनं बर्हिः प्रदिशा०	,,	,,				बर्हिः	,,
३० व्यचस्वतीरुर्विया विश्रयन्तां०	,,	,,				द्वारः	,,
३१ आसुष्वयन्ती यजते उपाके०	,,	,,				उषासानक्ता	,,
३२ दैव्या होतारा प्रथमा सुवाचा०	,,	,,				देव्या होतारा	,,
३३ आ नो यज्ञं भारती तूयमे०	,,	,,				तिस्रो देव्यः	,,
३४ यऽइमे द्यावापृथिवी जनित्री०	,,	,,				त्वष्टा	,,
३५ उपावसृज त्मन्या समञ्जन्०	,,	,,				वनस्पतिः	,,
३६ सद्यो जातो व्यमिमीत यज्ञ०	,,	,,				स्वाहाकृतयः	,,
३७ केतुं कृण्वन्नकेतवे०	,,	मधुच्छन्दाः				अग्निः(अ०)गायत्री	
३८ जीमूतस्येव भवति प्रतीकं०	,,	पायुः	भारद्वाजः			सन्नाहम्	त्रिष्टुप्
३९ धन्वगा गा धन्वनाजिं०	,,	,,				कार्मुकं	,,

ङ्गान्यृक्शोऽस्तौपीत्सन्नाहं, कार्मुकं, गुणमार्त्नी, तूणं, जगत्यर्धेन सारथिमर्धेन रश्मीन्हरीन्रथँ रथगोपायितॄञ्जगत्या लिङ्गोक्तदेवता द्वाभ्यां त्रिष्टुबनुष्टुब्भ्यामिषुमनुष्टुभा कशां, ततो हस्तघ्नं, ततस्तृचौ रथदुन्दुभिदेवत्यावैन्द्रोऽर्धर्चोऽन्त्यः, सर्वास्त्रिष्टुभोऽनुक्ता, आग्नेयः कृष्णग्रीव इत्याद्या एकादशिन्योर्द्वयोः पशुदेवता, अग्नये गायत्रायेति दश हविषो वेष्टेर्देवता ॥ १२ ॥ [य० अ० २९ मं० ३७–६०]

इति० संहितायां एकोनत्रिंशोऽध्यायः ।

देव सवितर्द्वावध्यायौ पुरुषमेधो नारायणः पुरुषो ददर्श, विश्वानि देव गायत्रीछं

४०	वक्ष्यन्ती वेदा गनीगन्ति०	प्रजापतिः	पायुः भारद्वाजः	गुणः	त्रिष्टुप्
४१	तेऽआचरन्ती समनेव०	,,	,,	आर्त्नी	,,
४२	बह्वीनां पिता बहुरस्य पुत्र०	,,	,,	तूणं	,,
४३	रथे तिष्ठन्नयति वाजिनः पुरो०	,,	,,	सारथिः	जगती
	अभीशूनां महिमानं पनायत०	,,	,,	रश्मयः	,,
४४	तीव्रान्घोषान्कृण्वते वृष०	,,	,,	हरयः (अश्वाः)	त्रिष्टुप्
४५	रथवाहणꣳ हविरस्य नाम०	,,	,,	रथः	,,
४६	स्वादुषꣳसदः पितरो वयो०	,,	,,	रथगोपायितारः	,,
४७	ब्राह्मणासः पितरः सोम्यासः०	,,	,,	लिङ्गोक्ता(ब्राह्मणादयः)	जगती
४८	सुपर्णं वस्ते मृगो अस्या दन्तो०	,,	,,	इषुः	त्रिष्टुप्
४९	ऋजीते परि वृंग्धि०	,,	,,	,,	अनुष्टुप्
५०	आ जङ्घन्ति सान्वेषां०	,,	,,	कशा	,,
५१	अहिरिव भौगैः पर्येति०	,,	,,	हस्तघ्नः	त्रिष्टुप्
५२	वनस्पते वीड्वङ्गो हि भूया०	,,	,,	रथः	,,
५३	दिवः पृथिव्याः पर्योजऽउद्भृतं०	,,	,,	,,	,,
५४	इन्द्रस्य वज्रो मरुतामनीकं०	,,	,,	,,	,,
५५	उप श्वासय पृथिवीमुत द्यां०	,,	,,	दुन्दुभिः	,,
५६	आक्रन्दय बलमोजो न०	,,	,,	,,	,,
५७	आमूरज प्रत्यावर्तयेमा०	,,	,,	,,	,,
	समश्वपर्णाश्चरन्ति नो नरो०	,,	,,	इन्द्रः	,,
५८	आग्नेयः कृष्णग्रीवः सरस्वती०	,,		पशवः	
५९	अग्नयेऽनीकवते रोहिताञ्जिः०	,,		,,	
६०	अग्नये गायत्राय त्रिवृते०	,,		(अग्न्यादयः)	

अथ० संहितायां त्रिंशोऽध्यायः ।

[पुरुषमेधः । अ. ३०—३१]

[अ.९ मं.१]	१ देव सवितः प्रसुव यज्ञं०	नारायणःपुरुषः		सविता	त्रिष्टुप्
[अ.३ मं.२५]	२ तत्सवितुर्वरेण्यं भर्गो देवस्य०	,,	विश्वामित्रः	,,	गायत्री

सावित्रीꣳ श्यावाश्वो, विभक्तारं मेधातिथिर्ब्रह्मणे ब्राह्मणमिति द्वे कण्डिके तपसेऽनुवाकश्च ब्राह्मणम् ॥ १३ ॥ [य० अ० ३० मं० १-२२]

इति० संहितायां त्रिंशोऽध्यायः ।

सहस्रशीर्षा पोडशर्चमानुष्टुभं त्रिष्टुवन्तं पुरुषो जगद्बीजमत्र देवताऽग्र्यः षट्च उत्तर-नारायणो मन्त्र, आद्यास्तिस्रस्त्रिष्टुभो द्वे अनुष्टुभावन्त्या त्रिष्टुप् ॥ १४ ॥ [य० अ० ३१ मं० १-२२]

इति० संहितायामेकत्रिंशोऽध्यायः ।

तदेव सर्वमेधोऽध्याय आत्मदैवतः सप्तमेऽहनि सर्वहोमे विनियुक्तः, सर्वमेधं ब्रह्म स्वयम्भ्वैक्षत तदीयं मन्त्रगणं प्र वायुमच्छेत्येतस्मादाद्ये द्वे अनुष्टुभौ, न तस्य द्विपदा गायत्री, हिरण्यगर्भश्चतस्रो मा मा हिꣳसीद्यस्मान्न द्वे एताः प्रतीकचोदिता ब्रह्मयज्ञे ध्येयाः, सर्वत्रैवमेषो ह चतस्रस्त्रिष्टुभ आपो ह यश्चित्प्रतीकचोदिते ॥ १५ ॥ [य० अ० ३२ मं० १-७]

वेनस्तत्पश्य त्रिष्टुभः सदसस्पतिं तृचेन मेधाकामो मेधां याचते, प्रथमा गायत्री

३ विश्वानि देव सवित०	नारायणःपुरुषः	श्यावाश्वः	सविता	गायत्री
४ विभक्तारꣳ हवामहे०	,,	मेधातिथिः	,,	,,
५-२२ ब्रह्मणे ब्राह्मणं॥५॥- अथैतानष्टौ०॥२२॥	,,			

अथ० संहितायां एकत्रिंशोऽध्यायः ।

१-१५ सहस्रशीर्षा० ॥१॥- सप्तास्यासन्०॥१५॥	नारायणःपुरुषः		पुरुषःजगद्बीजं	अनुष्टुप्
१६ यज्ञेन यज्ञमयजन्त देवा०	,,		,,	त्रिष्टुप्
[उत्तरनारायणः १७ अद्भ्यः संभृतः पृथिव्यै०	,,		आदित्यः	,,
मं.१७-२२] १८ वेदाहमेतं पुरुषं महान्त०	,,		,,	,,
१९ प्रजापतिश्चरति गर्भेऽअन्त०	,,		,,	,,
२० यो देवेभ्यऽआ तपति०	,,		,,	अनुष्टुप्
२१ रुचं ब्राह्मं जनयन्तो०	,,		,,	,,
२२ श्रीश्च ते लक्ष्मीश्च पत्न्या०	,,		,,	त्रिष्टुप्

अथ० संहितायां द्वात्रिंशोऽध्यायः । [सर्वमेधः अ० ३२]

१ तदेवाग्निस्तदादित्य०	ब्रह्म स्वयम्भु		आत्मा	अनुष्टुप्
२ सर्वे निमेषा जज्ञिरे०	,,		,,	,,
३ न तस्य प्रतिमाऽअस्ति०	,,		,,	द्विपदा गायत्री
४-७ एषो ह देवः०॥४॥- यं क्रन्दसी० ॥७॥	,,		,,	त्रिष्टुप्
८-१२ वेनस्तत्०॥८॥-परि द्यावापृथिवी०॥१२॥	,,		,,	,,
१३ सदसस्पतिमद्भुतं०	,,		,, लिङ्गोक्ता (सदसस्पतिः)	गायत्री

लिङ्गोक्तदेवता, द्वितीयाग्नेय्यनुष्टुप् तृतीया लिङ्गोक्तदेवतानुष्टुविदं मे मान्त्रवर्णिक्यनुष्टुवेतया देवेभ्यः श्रीकामो याचते श्रियम् ॥ १६ ॥ [य० अ० ३२ मं० ८--१६]

इति० संहितायां द्वात्रिंशोऽध्यायः ।

अस्याजरासः सप्तदशाग्निष्टुत्याग्निष्टोमिके प्रथमेऽहनि पुरोरुच आग्नेय्य आद्ये द्वे ऐन्द्रवायवस्यास्याजरासो वत्सप्रीर्हरयो धूमकेतवो विरूपो, यजा नो मैत्रावरुणस्य गोतमो, द्वे विरूपे शुक्रस्य कुत्सोऽयमिह मन्थिनो वैश्वदेवग्रहग्रहणे त्रीणि शता विश्वामित्र ऐन्द्राग्नस्याग्निर्वृत्राणि भरद्वाजो वैश्वदेवस्य विश्वेभिः सोम्यं मेधातिथिरायन्मरुत्वतीययो द्वे आ यत्पराशरः शाक्त्योऽग्ने शर्द्धोऽत्रिदुहिता विश्ववारा, त्वाꣳ हि भरद्वाजस्त्वे अग्ने द्वे बृहत्यावादित्यस्य त्वे अग्ने वसिष्ठः, श्रुधि प्रस्कण्व आदित्यग्रहग्रहणे विश्वेषामदितिर्वामदेवो गोतमो महो अग्नेः सावित्रस्य लुशोधानाकोऽनुक्तं गायत्रं त्रैष्टुम् ॥ १७ ॥ [य० अ० ३३ मं० १–१७]

---

	१४ यां मेधां देवगणाः०	ब्रह्म स्वयम्भु	अग्निः	अनुष्टुप्
	१५ मेधां मे वरुणो ददातु०	,,	लिङ्गोक्ता(वरुणादयः)	,,
	१६ इदं मे ब्रह्म च क्षत्रं०	,,	मन्त्रोक्ता (श्रीः)	,,
	अथ० संहितायां त्रयस्त्रिंशोऽध्यायः ।			
	१ अस्याजरासो दमामरित्रा०	वत्सप्रीः	अग्निः	त्रिष्टुप्
	२ हरयो धूमकेतवो०	विरूपः	,,	गायत्री
	३ यजा नो मित्रावरुणा०	गोतमः	,,	,,
[अ.१३।३७]	४ युक्ष्वा हि देवहूतमां०	विरूपः	,,	,,
	५ द्वे विरूपे चरतः स्वर्थे०	कुत्सः	,,	त्रिष्टुप्
[अ.३ । १५]	६ अयमिह प्रथमो धायि०	वामदेवः	,,	जगती
	७ त्रीणि शता त्रीसहस्राण्यग्निं०	विश्वामित्रः	,,	त्रिष्टुप्
[अ.७।२४]	८ मूर्धानं दिवोऽअरतिं पृथिव्या०	भरद्वाजः	वैश्वानरः	,,
	९ अग्निर्वृत्राणि जङ्घनद्०	,,	अग्निः	गायत्री
	१० विश्वेभिः सोम्यं मध्वग्न०	मेधातिथिः	,,	,,
	११ आ यदिषे नृपतिं तेजऽआनट्०	पराशरः शाक्त्यः	,,	त्रिष्टुप्
	१२ अग्ने शर्ध महते सौभगाय०	अत्रिदुहिता विश्ववारा	,,	,,
	१३ त्वाꣳ हि मन्द्रतममर्कशोकैः०	भरद्वाजः	,,	,,
	१४ त्वे अग्ने स्वाहुत प्रियासः०	वसिष्ठः	,,	बृहती
	१५ श्रुधि श्रुत्कर्ण वह्निभि०	प्रस्कण्वः	,,	,,
	१६ विश्वेषामदितिर्यज्ञियानां०	वामदेवः गोतमः	,,	त्रिष्टुप्
	१७ महोऽअग्नेः समिधानस्य०	लुशोधानाकः	,,	,,

इन्द्रस्तुत्युक्थे द्वितीयेऽहन्यैन्द्र्यः पुरोरुचो द्वादश प्रतीकचोदिते च द्वे तिस्रश्चापश्चिद्वसिष्ठो, गाव उप पुरुमीढाजमीढौ, यदद्य वसिष्ठ, आ सुते सुनीतिरातिष्ठन्तं विश्वामित्रः,प्र वः सूचीको, बृहन्नि त्रिशोक, इन्द्रेहि मधुच्छन्दा, इन्द्रो वृत्रं विश्वामित्रः, कुतस्त्वमगस्त्य, आ तद्गौरीवितिः शाक्त्य, इमां ते कुत्सो जगतीमनुक्तं गायत्रं त्रैष्टुभम् ॥१८॥ [य० अ० ३३ मं० १८-२९]

सूर्यस्तुत्युक्थ्ये तृतीयेऽहनि सौर्यश्चतुर्दश पुरोरुचस्तिस्रश्च प्रतीकोक्ता, विभ्राड् बृहज्जगती विभ्राट् सौर्य उदु त्यं तिस्रः प्रस्कण्व, आ नोऽगस्त्यो, यदद्य श्रुतकक्षसुकक्षौ, तरणिः प्रस्कण्वस्तत्सूर्यस्य द्वे कुत्सो, बण्महाँ द्वे जमदग्निर्बृहतीसतोबृहत्यौ, श्रायन्त इव

	१८ आपश्चित्पिप्युस्तर्यो न गावो०	वसिष्ठः	इन्द्रः	त्रिष्टुप्
	१९ गावऽउपावतावतं०	पुरुमीढाजमीढौ	,,	गायत्री
	२० यदद्य सूरऽउदिते०	वसिष्ठः	,,	,,
	२१ आ सुते सिञ्चत श्रियं०	सुनीतिः	,,	,,
[अ.७।१२]	तं प्रत्नथा०	अवत्सारः काश्यपः	,, विश्वेदेवाः	त्रिष्टुप्
[अ.७।१६]	अयं वेनः०	वेनः	,, वेनः	,,
	२२ आतिष्ठन्तं परि विश्वेऽअभूषन्०	विश्वामित्रः	,,	त्रिष्टुप्
	२३ प्र वो महे मन्दमानायान्धसो०	सुचीकः	,,	,,
	२४ बृहन्निदिध्मऽएषां भूरि०	त्रिशोकः	,,	गायत्री
	२५ इन्द्रेहि मत्स्यन्धसो०	मधुच्छन्दाः	,,	,,
	२६ इन्द्रो वृत्रमवृणोच्छर्धनीतिः०	विश्वामित्रः	,,	त्रिष्टुप्
	२७ कुतस्त्वमिन्द्र माहिनः०	अगस्त्यः	,,	,,
	२८ आ तत्तऽइन्द्रायवः०	गौरीवितिः शाक्त्यः	,,	,,
	२९ इमां ते धियं प्र भरे महो०	कुत्सः	,,	जगती
	३० विभ्राड् बृहत्पिबतु सोम्यं०	विभ्राट् सौर्य	सूर्यः	,,
३१-३३	उदु त्यं०॥३१॥- दैव्यावध्व० ॥३३॥	प्रस्कण्वः	,,	गायत्री
[अ.७।१२]	तं प्रत्नथा०	अवत्सारः काश्यपः	,, विश्वेदेवाः	त्रिष्टुप्
[अ.७।१६]	अयं वेनः०	वेनः	,, वेनः	,,
[अ.७।४२]	चित्रं देवानां०	कुत्सः	,,	,,
	३४ आ नऽइडाभिर्विदथे०	अगस्त्यः	,,	,,
	३५ यदद्य कच्च वृत्रहन्नुदगा०	श्रुतकक्ष-सुकक्षौ	,,	गायत्री
	३६ तरणिर्विश्वदर्शतो०	प्रस्कण्वः	,,	,,
	३७ तत्सूर्यस्य देवत्वं तन्महित्वं०	कुत्सः	,,	त्रिष्टुप्
	३८ तन्मित्रस्य वरुणस्याभिचक्षे०	,,	,,	,,
	३९ बण्महाँ२ऽ असि सूर्य०	जमदग्निः	,,	बृहती

नृमेधो वृहतीमद्या देवाः कुत्स, आ कृष्णेन हिरण्यस्तूप आङ्गिरसोऽनाख्यातꣳ सौर्यं गायत्रं त्रैष्टुभम् ॥ १९ ॥ [य० अ० ३३ मं० ३०–४३]

वैश्वदेवस्तुतिश्चतुर्थेऽहनि, वैश्वदेव्यः पुरोरुच एकादश षट् च प्रतीकोक्ताः, प्र वावृजे वसिष्ठस्त्रिष्टुभमिन्द्रवायू बृहस्पतिं द्वे मेधातिथिरधि नः कुसीदी काण्वोऽग्न इन्द्र प्रतिक्षत्र, इन्द्राग्नी मित्रावरुणा जगतीं काश्यपोऽवत्सारोऽस्मे रुद्राः प्रगाथोऽर्वाञ्चो अद्य कूर्मो गार्त्समदो, विश्वे अद्य लुशोधानाको, विश्वे देवाः सुहोत्रो, देवेभ्यो हि वामदेवो जगतीमनुक्तं गायत्रं त्रैष्टुभम् ॥ २० ॥ [य० अ० ३३ मं० ४४–५४]

अथानारभ्याधीतं मन्त्रगणमर्वाक्पितृमेधादादित्ययाज्ञवल्क्यौ ददृशतुः, प्र वायुं पञ्चदशर्चः पुरोरुग्गणो द्वे च प्रतीकोक्ते, प्र वायुमृजिश्वा, मित्रꣳ हुवे द्वे मधुच्छन्दा, मित्रं

	४०	बट् सूर्य श्रवसा महाँ०	जमदग्निः	सूर्यः	सतोबृहती
	४१	श्रायन्तऽइव सूर्यं०	नृमेधः	,,	बृहती
	४२	अद्या देवाऽउदिता सूर्यस्य०	कुत्सः	,,	त्रिष्टुप्
	४३	आ कृष्णेन रजसा०	हिरण्यस्तूपः आङ्गिरसः	,,	,,
	४४	प्र वावृजे सुप्रया बर्हिरेषामा०	वसिष्ठः	विश्वेदेवाः	त्रिष्टुप्
	४५	इन्द्रवायू बृहस्पतिं०	मेधातिथिः	,,	गायत्री
	४६	वरुणः प्राविता भुवन्मित्रो०	,,	,,	,,
	४७	अधि न इन्द्रैषां विष्णो०	कुसीदी काण्वः	,,	,,
		तं प्रत्नथा० [अ. ७।१२]			
		अयं वेनः० [अ. ७।१६]			
		ये देवासः० [अ. ७।१९]			
		आ न इडाभि० [अ. ३३।३४]			
		विश्वेभिः सोम्यं मधु० [३३।१०]			
		ओमासश्चर्षणीधृतः० [७।३३]			
	४८	अग्नऽइन्द्र वरुण मित्र देवाः०	प्रतिक्षत्रः	,,	त्रिष्टुप्
	४९	इन्द्राग्नी मित्रावरुणादितिꣳ०	काश्यपोऽवत्सारः	,,	जगती
	५०	अस्मे रुद्रा पर्वता मेहनासो०	प्रगाथः	,,	त्रिष्टुप्
	५१	अर्वाञ्चोऽअद्या भवता यजत्रा०	कूर्मः गार्त्समदः	,,	,,
[अ.१८।३१]	५२	विश्वेऽअद्य मरुतो विश्वऽउती०	लुशोधानाकः	,,	,,
	५३	विश्वे देवाः शृणुतेमꣳ हवं मे०	सुहोत्रः	,,	,,
	५४	देवेभ्यो हि प्रथमं यज्ञियेभ्यो०	वामदेवः	,,	जगती
	५५	प्र वायुमच्छा बृहती मनीषा०	आदित्ययाज्ञवल्क्यौ, ऋजिश्वा	वायुः	त्रिष्टुप्
	५६	इन्द्रवायूऽइमे सुता०	,,	इन्द्रवायू	गायत्री
	५७	मित्रꣳ हुवे पूतदक्षं०	,, मधुच्छन्दाः	लिङ्गोक्ता(मित्रावरुणौ)	,,

लिङ्गोक्ता, दस्रा युवाकव आश्विनीं, विदद्यदैन्द्रीं कुशिको, न हि स्पशं विश्वामित्रो वैश्वानरीमुग्रा विघनिनैन्द्राग्नीं भरद्वाज, उपास्मै सौमीं देवलोऽसितो वा, ये त्वा विश्वामित्रो, जनिष्ठा उग्रो गौरीवितिरा तू वामदेवस्तृचमैन्द्रं, त्वमिन्द्रैन्द्यौ नृमेधः पथ्यावृहतीसतोबृहत्यौ, यज्ञो देवानां कुत्सोऽदब्धेभिः सावित्रीं जगतीं भरद्वाज, [अनुक्तं गायत्रं त्रैष्टुभम्] ॥ २१ ॥ [य०अ०३३ मं०५५-६९]

प्र वीरया पञ्चदशर्चः पुरोरुग्गणो द्वे च प्रतीकोक्ते, प्र वीरया वसिष्ठो वायव्यां, काव्ययोराजानेषु दक्षस्तिरश्चीनः परमेष्ठी प्रजापतिर्भाववृत्तमा रोदसी जगतीं विश्वामित्र, उक्थेभिर्वृत्रहन्तमा वसिष्ठ उप नः सुहोत्रो वैश्वदेवीं, ब्रह्माणि मेऽगस्त्यो द्वे इन्द्रमरुत्संवादे,

	५८	दस्रा युवाकवः सुता० आदित्ययाज्ञवल्क्यौ तं प्रत्नथा० [अ. ७।१२] अयं वेनः [अ, ७।१६]		मधुच्छन्दाः	अश्विनौ	गायत्री
	५९	विदद्यदी सरमा रुग्णमद्रेः०	,,	कुशिकः	इन्द्रः	त्रिष्टुप्
	६०	न हि स्पशमविदन्नन्यमस्मा०	,,	विश्वामित्रः	वैश्वानरः	,,
	६१	उग्रा विघनिना मृधः०	,,	भरद्वाजः	इन्द्राग्नी	गायत्री
	६२	उपास्मै गायता नरः०	,,	देवलः, असितः वा	सोमः	,,
	६३	ये त्वाहिहत्ये मघवन्नवर्धन्ये०	,,	विश्वामित्रः	इन्द्रः	त्रिष्टुप्
	६४	जनिष्ठाऽउग्रः सहसे तुराय०	,,	गौरीवितिः	,,	,,
	६५	आ तू नऽइन्द्र वृत्रहन्०	,,	वामदेवः	,,	गायत्री
	६६	त्वमिन्द्र प्रतूर्तिष्वभि०	,,	नृमेधः	,,	पथ्याबृहती
	६७	अनु ते शुष्मं तुरयन्तमीयतुः०	,,	,,	,,	सतोबृहती
[अ.८ मं४]	६८	यज्ञो देवानां प्रत्येति सुम्न०	,,	कुत्सः	आदित्यः	त्रिष्टुप्
	६९	अदब्धेभिः सवितः०	,,	भरद्वाजः	सविता	जगती
	७०	प्र वीरया शुचयो दद्रिरे वा०	,,	वसिष्ठः	वायुः	त्रिष्टुप्
[अ.३३।१९]	७१	गावऽउपावतावतं०	,,	पुरुमीढाजमीढौ	इन्द्रः	गायत्री
	७२	काव्ययोराजानेषु०	,,	दक्षः	मित्रावरुणौ	,,
[अ.३३।३३]	७३	दैव्यावध्वर्यूऽआ गतꣳ तं प्रत्नथा० [अ.७।१२] अयं वेनः [अ.७।१६]	,,	प्रस्कण्वः	सूर्यः	,,
	७४	तिरश्चीनो विततो रश्मिरेषा०	,,	परमेष्ठी प्रजापतिः	भाववृत्तं(विश्वेदेवाः)	त्रिष्टुप्
	७५	आ रोदसीऽअपृणदा०	,,	विश्वामित्रः	वैश्वानरः	जगती
	७६	उक्थेभिर्वृत्रहन्तमा०	,,	वसिष्ठः	इन्द्राग्नी	गायत्री
	७७	उप नः सूनवो गिरः०	,,	सुहोत्रः	विश्वेदेवाः	,,
	७८	ब्रह्माणि मे मतयः०	,,	अगस्त्यः	इन्द्रामरुतौ	त्रिष्टुप्

तदिदाथर्वणो बृहद्दिव, इमा उ त्वा द्वे बृहत्यौ मेधातिथिरयꣳ सहस्रं मेधातिथिः सतोबृहतीम्[अनुक्तं गायत्रं त्रैष्टुभम्] ॥ २२ ॥ [य० अ० ३३ मं० ७०--८४]

आनस्त्रयोदर्शर्चः पुरोरुग्गणश्चतुर्ऋचं प्रतीकचोदितं चानो वायव्यां जमदग्निरिन्द्रवायू सुसन्दृशेन्द्रवायव्यां तापस, ऋधगित्था मैत्रावरुणीं जमदग्निरा यातमाश्विनीं वसिष्ठः, प्रैतु वैश्वदेवीं कण्वश्चन्द्रमा अप्स्वैन्द्रीमाहुतिपरिणामवादिनीं त्रित आप्त्यो, देवं देवं वो मनुर्वैवस्वतो वैश्वदेवीं, दिवि पृष्टो मेध ऐन्द्र, इन्द्राग्नी अपात्सुहोत्रो, देवासो हि मनुरपाधमद् द्वे नृमेधोऽस्येन्मेधातिथिर्दशम्येकादश्यन्त्या सतोबृहत्यः, शेषा बृहत्यः शेषा बृहत्यः ॥ २३ ॥ [य० अ०३३ मं० ८५--९७]

इति० संहितायां त्रयस्त्रिंशोऽध्यायः ।

इति सर्वानुक्रमसूत्रे तृतीयोऽध्यायः ।

अथ सर्वानुक्रमसूत्रे चतुर्थोऽध्यायः ।

यज्ञाग्रतः षड्ऋचं मानसं त्रैष्टुभꣳ शिवसङ्कल्पः, पितुं नूष्णिहमगस्त्योऽन्नस्तुतिमन्वि-

७९	अनुत्तमा ते मघवन्नकिर्नु०	आदित्ययाज्ञवल्क्यौ, अगस्त्यः		इन्द्रामरुतौ	त्रिष्टुप्
८०	तदिदास भुवनेषु ज्येष्ठं०	,,	आथर्वणो बृहद्दिवः	महेन्द्रः	,,
८१–८२	इमाऽउ त्वा०॥८१॥–यस्यायं विश्व०॥८२॥	,,	मेधातिथिः	आदित्यः	बृहती
८३	अयꣳ सहस्रमृषिभिः०	,,	,,	,,	सतोबृहती
[अ.३३।६९] ८४	अदब्धेभिः सविताः०	,,	भरद्वाजः	सविता	जगती
८५	आ नो यज्ञं दिविस्पृशं०	,,	जमदग्निः	वायुः	बृहती
८६	इन्द्रवायू सुसन्दृशा०	,,	तापसः	इन्द्रवायू	,,
८७	ऋधगित्था स मर्त्यः०	,,	जमदग्निः	मित्रावरुणौ	,,
८८	आ यातमुप भूषतं०	,,	वसिष्ठः	अश्विनौ	,,
८९	प्रैतु ब्रह्मणस्पतिः०	,,	कण्वः	विश्वेदेवाः	,,
९०	चन्द्रमाऽअप्स्वन्तरा०	,,	त्रितः आप्त्यः	इन्द्रः	,,
९१	देवं-देवं वोऽवसे०	,,	मनुः वैवस्वतः	विश्वेदेवाः	,,
९२	दिवि पृष्टोऽअरोचत०	,,	मेधाः ऐन्द्रः	वैश्वानरः	,,
९३	इन्द्राग्नीऽअपादियं०	,,	सुहोत्रः	इन्द्राग्नी	,,
९४	देवासो हि ष्मा मनवे०	,,	मनुः	विश्वेदेवाः	सतोबृहती
९५	अपाधमदभिशस्तीरशस्तिहा०	,,	नृमेधः	इन्द्रः(मरुत्वान्)	,,
९६	प्र वऽइन्द्राय बृहते०	,,	,,	,,	बृहती
९७	अस्येदिन्द्रो वावृधे वृष्ण्यꣳ०	,,	मेधातिथिः	महेन्द्रः	सतोबृहती

इति सर्वानुक्रमसूत्रे तृतीयोऽध्यायः ।

चतुर्ऋचमानुष्टुभं, द्वयोरनुमतिर्द्वयोः सिनीवालीसरस्वत्यौ, सिनीवालि पृथुष्टुके द्वे गृत्समदस्त्वमग्ने द्वे आग्नेय्यौ जगत्यौ हिरण्यस्तूप आङ्गिरस, उत्तानायां द्वे देवश्रवा देववातश्च भारतावाद्या त्रिष्टुब्द्वितीयानुष्टुप्र मन्महे नोधा द्वयृचमैन्द्रं त्रिष्टुभमिच्छन्ति त्वा द्वयृचमैन्द्रं त्रैष्टुभमेव देवश्रवा देववातश्च भारतौ ॥ १ ॥ [य० अ०३४ मं १-१९]

अषाढं युत्सु गोतमश्चतुर्ऋचं त्रैष्टुभꣳ सौम्यमष्टौ व्यख्यच्चतुर्ऋचं त्रैष्टुभꣳ सावित्रमाङ्गिरसो हिरण्यस्तूपो द्वितीया जगत्युभा पिबतमाश्विनं तृचमुभा पिबतं प्रस्कण्वो गायत्रीमभ्रस्वतीमश्विना त्रिष्टुभौ कुत्स, आ रात्रि पथ्याबृहतीꣳ रात्रिदेवत्यां कशिपा भरद्वाज-

अथ सर्वानुक्रमसूत्रे चतुर्थोऽध्यायः ।

अथ० संहितायां चतुस्त्रिंशोऽध्यायः ।

१-६ यज्जाग्रतो०॥१॥- सुषारथिरश्वानिव०॥६॥	शिवसंकल्पः, आदित्ययाज्ञवल्क्यौ		मनः		त्रिष्टुप्
७ पितुं नु स्तोषं महो०	अगस्त्यः	,,	अन्नम्		उष्णिक्
८ अन्विदनुमते त्वं मन्यासै०		,,	अनुमतिः		अनुष्टुप्
९ अनु नोऽद्यानुमति०		,,	,,		,,
१० सिनीवालि पृथुष्टुके०	गृत्समदः	,,	सिनीवाली		,,
११ पञ्च नद्यः सरस्वती०	,,	,,	सरस्वती		,,
१२ त्वमग्ने प्रथमोऽअङ्गिरा०	हिरण्यस्तूपः आङ्गिरसः	,,	अग्निः		जगती
१३ त्वं नोऽअग्ने तव देव०	,, ,,	,,	,,		,,
१४ उत्तानायामवभरा०	देवश्रवा देववातश्च भारतौ	,,	,,		त्रिष्टुप्
१५ इडायास्त्वा पदे वयं०	,, ,,	,,	,,		अनुष्टुप्
१६ प्र मन्महे शवसानाय शूष०	नोधाः	,,	इन्द्रः		त्रिष्टुप्
१७ प्र वो महे महि नमो०	,,	,,	,,		,,
१८ इच्छन्ति त्वा सोम्यासः०	देवश्रवा देववातश्च भारतौ	,,	,,		,,
१९ न ते दूरे परमा०	,, ,,		,,		,,
२० अषाढं युत्सु पृतनासु०	गोतमः	,,	सोमः		,,
२१ सोमो धेनुꣳ सोमो०	,,	,,	,,		,,
२२ त्वमिमाऽओषधीः सोम०	,,	,,	,,		,,
२३ देवेन नो मनसा देव सोम०	,,	,,	,,		,,
२४ अष्टौ व्यख्यत्ककुभः	हिरण्यस्तूपःआंगिरसः	,,	सविता		,,
२५ हिरण्यपाणिः सविता०	,, ,,	,,	,,		जगती
२६ हिरण्यहस्तोऽसुरः सुनीथः०	,, ,,	,,	,,		त्रिष्टुप्
२७ ये ते पन्थाः सवितः०	,, ,,	,,	,,		,,
२८ उभा पिबतमश्विनोभा०	प्रस्कण्वः	,,	अश्विनौ		गायत्री
२९-३० अभ्रस्वती०॥२९॥-द्युभिरक्तुभिः०॥३०॥	कुत्सः	,,	,,		त्रिष्टुप्

दुहितोपस्तदुपस्सां परोष्णिहं गोतमः, प्रातरग्निं वसिष्ठः सप्तर्चमाद्या जगती बहुदेवत्या, पञ्च भगदेवत्यास्त्रिष्टुभोऽन्त्योपस्साः ॥ २ ॥ [य० अ० ३४ मं० २०–४०]

पूषन्तव सुहोत्रः, पथस्पथः परिपतिमृजिश्वैते पौष्ण्यौ गायत्रीत्रिष्टुभौ, त्रीणि पदा वैष्णव्यौ गायत्र्यौ मेधातिथिर्घृतवती भुवनानां भरद्वाजो द्यावापृथिव्यां जगतीं, ये नो लिङ्गोक्तदेवतां त्रिष्टुभं विहव्य, आ नासत्या हिरण्यस्तूप आश्विनीमेष वो मारुतीं त्रिष्टुभमगस्त्यः, सहस्तोमा ऋषिसृष्टिप्रतिपादिकां त्रिष्टुभं यज्ञः प्राजापत्य, आयुष्यं वर्चस्यं तृचं दक्ष उष्णिक्शक्करीत्रिष्टुभो हिरण्यस्तुतिरुत न ऋजिश्वा बहुदेवत्यां त्रिष्टुभमिमा गिरः कूर्मो गार्त्समद आदित्यदेवत्यां त्रिष्टुभञ्च, सप्त ऋषयोऽध्यात्मवादिनी जगत्युत्तिष्ठ तृचो ब्राह्मणस्पत्य आद्ये बृहत्यौ कण्वो घौरोऽन्त्यां त्रिष्टुभं गृत्समदो, य इमा चतुर्ऋचं

[अ.३३।४३]	३१ आ कृष्णेन रजसा०	हिरण्यस्तूपः आंगिरसः	आदित्ययाज्ञवल्क्यौ	सूर्यः	त्रिष्टुप्
	३२ आ रात्रि पार्थिवꣳ रजः०	कशिपा भरद्वाजदुहिता	,,	रात्रिः	पथ्याबृहती
	३३ उषस्तच्चित्रमा भरा०	गोतमः	,,	उषाः	परोष्णिक्
	३४ प्रातरग्निं प्रातरिन्द्रꣳ०	वसिष्ठः	,,	बहुदेवताः(अग्न्यादयः)	जगती
३५–३९	प्रातर्जितं०॥३५॥–समध्वरा०॥३९॥	,,	,,	भगः	त्रिष्टुप्
	४० अश्वावतीर्गोमतीर्नऽउषासो०	,,	,,	उषाः	,,
	४१ पूषन्तव व्रते वयं०	सुहोत्रः	,,	पूषा	गायत्री
	४२ पथस्पथः परिपतिं०	ऋजिश्वा	,,	,,	त्रिष्टुप्
	४३ त्रीणि पदा वि चक्रमे०	मेधातिथिः	,,	विष्णुः	गायत्री
	४४ तद्विप्रासो विपन्यवो०	,,	,,	,,	,,
	४५ घृतवती भुवनानामभि०	भरद्वाजः	,,	द्यावापृथिवी	जगती
	४६ ये नः सपत्नाऽअप ते०	विहव्यः	,,	लिङ्गोक्ता(इन्द्राग्न्यादयः)	त्रिष्टुप्
	४७ आ नासत्या त्रिभिरेका०	हिरण्यस्तूपः	,,	अश्विनौ	जगती
	४८ एष व स्तोमो मरुत०	अगस्त्यः	,,	मरुतः	त्रिष्टुप्
	४९ सहस्तोमाः सहच्छन्दस०	यज्ञः प्राजापत्यः	,,	(ऋषिसृष्टिः)	,,
	५० आयुष्यं वर्चस्यꣳ०	दक्षः	,,	हिरण्यम्	उष्णिक्
	५१ न तद्रक्षाꣳसि न पिशाचा०	,,	,,	,,	शक्करी
	५२ यदाबध्नन्दाक्षायणा०	,,	,,	,,	त्रिष्टुप्
	५३ उत नोऽहिर्बुध्न्यः शृणोत्वज०	ऋजिश्वा	,,	बहुदेवताः(पृथिव्यादयः)	,,
	५४ इमा गिरऽआदित्येभ्यो०	कूर्मः गार्त्समदः	,,	आदित्याः	,,
	५५ सप्तऽऋषयः प्रतिहिताः०		,,	(सप्तऋषयः)	जगती
	५६ उतिष्ठ ब्रह्मणस्पते०	कण्वो घौरः	,,	ब्रह्मणस्पतिः	बृहती
	५७ प्र नूनं ब्रह्मणस्पति०	,, ,,	,,	,,	,,
	५८ ब्रह्मणस्पते त्वमस्य यन्ता०	गृत्समदः	,,	,,	त्रिष्टुप्

प्रतीकोक्तम् ॥ ३ ॥ [य० अ० ३४ मं० ४१-५८]

इति० संहितायां चतुस्त्रिंशोऽध्यायः ।

